# वृत्तं अलङ्कारः चम्पू च

Course Code: B21SN07DC

Discipline Core Course

Undergraduate Programme in Sanskrit Language and Literature

Self Learning Material

Part - 2



SREENARAYANAGURU OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# वृत्तं अलङ्कारः चम्पू च

Course Code: B21SN07DC

Semester - VI

## Discipline Core Course
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

## CONTENTS

### PART - I


**Block-1 चम्पूरामायणम् – बालकाण्डम् श्लोकाः 1-57** 1

Unit -1 आमुखश्लोकाः, पुत्रकामेष्टिश्च, प्रथमश्लोकादारभ्य द्वादशश्लोकादनन्तरं पुत्रीयामिष्टिमारभत इति वाक्यपर्यन्तम् 2

Unit - 2 श्लोकाः 13 - 30, देवानां विष्णुस्तुतिः श्रीरामावतारः च 16

Unit - 3 श्लोकाः 31 - 43, ताटकावधः, स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत् (43) इति पर्यन्तम् 41

Unit - 4 श्लोकाः 44 - 57, सिद्धाश्रमप्रवेशः, यागसंरक्षणं, सुबाहुप्रमुखानां निग्रहः च 58

**Block-2 चम्पूरामायणम् – बालकाण्डम् श्लोकाः 58-117** **73**

Unit - 1 श्लोकाः - 54 -88, भागीरथीकथा, अजानुपावन क्षीरां वृषानन्दविधायिनीम्, श्रुतिप्रणयीनीकोऽयमापगामापगामिव इत्यरभ्य भगीरथः पुरं प्राप परिपूर्णमनोरथः इति पर्यन्तम् 74

Unit - 2 श्लोकाः 88 - 98, विशालापुरीवर्णनं अहल्यामोक्षः विश्वामित्रस्य ब्रहमर्षिपदप्राप्तिश्च 94

Unit - 3 श्लोकाः 99 - 108, सीतामाहात्म्यवर्णनं, शैवचापभञ्जनं च 111

Unit - 4 श्लोकाः 109 -117, परशुरामगर्वभञ्जनम्, अयोध्याप्रवेशश्च 123


### PART - II


**Block-3 अलङ्काराः 1 कुवलयानन्दमाधारीकृत्य अधोनिर्दिष्टाश्चत्वारोऽलङ्काराः** **134**

Unit - 1 उपमा 135

Unit - 2 प्रतीपम् 142

Unit - 3 उत्प्रेक्षा 149

Unit - 4 रूपकम् 157

**Block-4 अलङ्काराः 2** **163**

Unit - 1 अतिशयोक्तिः(सप्रभेदः) 164

Unit - 2 उल्लेखः अर्थान्तरन्यासश्च 173

Unit - 3 दृष्टान्तः समासोक्तिः स्वभावोक्तिश्च 179

**Block-5 अलङ्काराः 3** **184**

Unit - 1 अपह्नुतिः (सप्रभेदः) 184

Unit - 2 व्यतिरेकः तुल्ययोगिता च 193

Unit - 3 अप्रस्तुतप्रशंसा श्लेषश्च 200

**Block-6 वृत्तम्** **206**

Unit - 1 वृत्तपरिचयः, वृत्तभेदाः, आर्यावृत्तम्, अनुष्टुप् च 207

Unit - 2 इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वसन्ततिलका च 218

Unit - 3 मालिनी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा, वंशस्थञ्च 226

Unit - 4 तोटकम्, पुष्पिताग्रा च 236

**Model Question Paper (SET – A)** **242**

**Model Question Paper (SET – B)** **245**

BLOCK-3

# अलङ्काराः 1
# कुवलयानन्दमाधारीकृत्य अधोनिर्दिष्टाश्चत्वारोऽलङ्काराः

# Unit - 1
# उपमा

## उद्देश्यानि (Learning Outcomes)

- उपमा अलङ्कारस्य वैशिष्ट्यं जानाति।
- काव्येषु अलङ्कारप्रयोगविषये प्राविण्यसम्पादनम्।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्त्तुं शक्नोति।

## प्राग्व्यपेक्षाः (Prerequisites)

'अलं करोतीति अलङ्कारः' 'आभूषितं करोतीति अलंकारः' अलं कृ धातोः घञः योगेन अलंकारशब्दः सिद्ध्यति। आभूषितकरणमेव अलंकारः। अलंकारः काव्यस्य महत्त्वपूर्णमङ्ग वर्तते। अलङ्कृतिरलङ्कारः। काव्यसौन्दर्यस्य विधायकानां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रम्। आधुनिकेषु सर्वप्रथमः अलङ्कारशास्त्रग्रन्थः भवति भामहप्रणीतः काव्यालङ्कारः इति। अत एव अस्य शास्त्रस्य अलङ्कारनाम्ना प्रसिद्धिः। काव्यशास्त्रस्य वास्तविकं नाम अलङ्कारशास्त्रम् इति। अलंकारस्य त्रयो भेदाः (1) शब्दालंकारः, (2) अर्थालङ्कारः, (3) उभयालङ्कारश्चेति मन्यन्ते। 'शब्दार्थौ सहितौ काव्यम्' इति भामहकथनेन स्पष्टं भवति यत् 'सत्यं शिवं सुन्दरम्' इत्यत्र चरमतत्त्वं सुन्दरमेव वर्तते। शिव-सुन्दरयोश्च यदा सत्येन सह संयोगो भवति, तदा संसारे मंगलोदयः भवति। ते आचार्याः गुण, रस, रीति, भावादिविषयाः अलङ्कारस्य अन्तर्गते मन्यन्ते। भगवान् शंकरः अलङ्कारशास्त्रस्य शिक्षणं सर्वप्रथमं ब्रह्मणे दत्तवान्, ब्रह्मा च देवेभ्यः कतिभ्यश्च ऋषिभ्यश्च तत् शिक्षां ददौ। तदनुसृत्याष्टादश ब्रह्मशिष्या अष्टादशस्वधिकरणेषु शास्त्रमिदं निबद्धवन्तः।

अप्पय्यदीक्षितः षोडशे शतके स्वजीवितेन साहित्यनभोमण्डलं प्रशोभयामास। काव्यशास्त्रे तस्य योगदानं समुन्नतमेव। तेन महात्मना चतुरधिकशतमिताः ग्रन्थाः रचिताः। तेषु चित्रमीमांसा, कुवलयानन्दः, वृत्तिवार्तिकञ्च काव्यशास्त्रसम्बद्धाः।

कुवलयानन्दः अर्थालङ्कारसम्बद्धो ग्रन्थः। तस्मिन् १२३ अलङ्काराः निरूपिताः। तेषु ९६ अलङ्काराः जयदेवस्य चन्द्रालोकात् गृहीताः। शेषाः १७ अप्पय्यदीक्षितेन स्वयमेवोद्भाविताः अन्येभ्यो गृहीताः वा। दीक्षितमहाशयेन निरूपितेषु अलङ्कारेषु उपमा नाम अलङ्कारस्य अध्ययनं अस्मिन् एकके करिष्यामः। साहित्यादिषु उपमालङ्कारस्य बहुप्रयोगः अस्ति। उपमालङ्कारः अत्यन्तं प्राचीनः भवति । तथापि 'अलङ्कारस्तु एकैव। सा उपमैविति' आलङ्कारिकमतम्।

## मुख्यपदानि (Keywords)

साद्दश्यं, उपमानम्, उपमेयं, साधारणधर्मः, उपमावाचकः, इव, पूर्णोपमा, लुप्तोपमा।

## Discussion

### 3.1.1 उपमा

उपमीयते इति उपमा। उपमा साद्दश्यमूलकः भेदाभेदप्रधानः अलङ्कारः भवति।

**उपमा यत्र साद्दश्यलक्ष्मीरुल्लसति द्वयोः।**

**हंसीव कृष्ण, ते कीर्तिः स्वर्गङ्गामवगाहते।।**

यस्मिन् काव्ये द्वयोः उपमानोपमेययोः साद्दश्यलक्ष्मीः, सहृदयहृदयाह्लादिसाद्दश्यम् उल्लसति स्पष्टं प्रकाशते सा उपमा। 'हंसीव कृष्ण ...'इत्युदाहरणम्। हे कृष्ण, ते कीर्तिः हंसीव आकाशगङ्गाम् अवगाहते। अत्र कीर्तिहंस्योः साद्दश्यलक्ष्मीः स्पष्टं प्रकाशते इत्यतः उपमालङ्कारः।

उपमायाः चत्वारोऽवयवाः सन्ति। उपमानम्, उपमेयं, साधारणधर्मः, उपमावाचकः चेति। येन उपमीयते तत् उपमानम्। प्रसिद्धं वस्तु उपमानम्। अत्र हंसी उपमानम्। यद् उपमीयते तत् उपमेयम्। अप्रसिद्धं वस्तु

(न्यूनगुणं, वर्ण्यमानं वा) उपमेयम्। अत्र कीर्तिः उपमेयम्। आह्लादकत्वादिकं साधारणधर्मः। अत्र स्वर्गङ्गावगाहनं साधारणधर्मः। इवादिशब्दाः उपमावाचकाः। सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। धर्मगतसमानता इत्यर्थः। अत्र हंसी कीर्तिश्च स्वर्गङ्गायां अवगाहते इति तयोः समानधर्मता।

उपमा द्विविधा - पूर्णा लुप्ता चेति। यत्र चतुर्णामपि अवयवानाम् उपादानं तत्र पूर्णोपमा। यथा 'हंसीव कृष्ण ...' इत्युदाहरणे हंसी उपमानं, कीर्तिरुपमेयं, स्वर्गङ्गावगाहनं साधारणो धर्मः, इवशब्दः उपमावाचकः इति चतुर्णामप्युपादानात्पूर्णोपमा। एषु यस्य कस्यचिदङ्गस्य अभावे लुप्तोपमा स्यात्।

### पूर्णोपमायाः अपरमुदाहरणम्।

**गुणदोषौ बुधौ गृह्णन् इन्दुक्ष्वेडाविवेश्वरः।**
**शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति।।**

बुधः गुणदोषौ चन्द्रविषौ ईश्वरः इव गृह्णाति। पूर्वम् इन्दुं शिरसा श्लाघते। परं विषत्वात् कण्ठे नियन्त्रयति। अत्र बुधः उपमेयम्। ईश्वरः उपमानम्। उपमानगतयोः चन्द्रगरलयोः उपमेयगतयोः गुणदोषयोश्च गोप्यगोपनं, श्लाघ्यश्लाघा च साधारणधर्मः। इवशब्दो उपमावाचकः। तस्मादत्र पूर्णोपमा।

### 3.1.1.2 लुप्तोपमा, तद्भेदाश्च।

वर्ण्यस्य (उपमेयस्य), उपमानस्य, साधारणधर्मस्य, उपमावाचकस्य च मध्ये एकस्य, द्वयोः, त्रयाणां वा अनुपादाने (अप्रयोगे) लुप्तोपमा। लुप्तोपमा अष्टधा।

1. वाचकमात्रलोपात् वाचकलुप्ता।
2. साधारणधर्मलोपात् धर्मलुप्ता।
3. धर्मवाचकयोः लोपात् धर्मवाचकलुप्ता।
4. वाचकोपमेययोः लोपात् वाचकोपमेयलुप्ता।
5. उपमानमात्रलोपात् उपमानलुप्ता।

6. वाचकोपमानयो: लोपात् वाचकोपमानलुप्ता ।
7. धर्मोपमानयो: लोपात् धर्मोपमानलुप्ता ।
8. धर्मोपमानवाचकानां लोपात् धर्मोपमानवाचकलुप्ता च ।

### लुप्तोपमायाः उदाहरणानि ।

**तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मया ।**

**कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ।।**

**यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः ।**

**तदेतत्काकतालीयमवितर्कितसम्भवम् ।।**

तडिदिव प्रशोभमाना तन्वी मया रहसि दृष्टा । इन्दुतुल्यास्या मम दृशो: कर्पूरमिवाचरन्ती सा कान्त्या शोभया स्मरवधूमिव (रतीमिव) आचरन्ती आसीत् । तया सह मम यत् मेलनं तत्र (विजनस्थले) सम्भूतं तत् काकतालीयमेवेति अवितर्कितसम्भवमेव । (यादृच्छिकमेव)

अत्र तडिद्गौरी इत्यत्र तन्वी तडिदिव गौरी इत्यर्थ: । अत्र इव शब्दस्य लोपात् वाचकलुप्ता । तन्वी उपमेयम्, तडिदुपमानम्, गौरत्वं साधारणधर्मश्च सन्ति ।

इन्दुतुल्यास्या इत्यस्य इन्दुना तुल्यम् आस्यं यस्या: सा इत्यर्थ: । अत्र इन्दुरुपमानम्, आस्यमुपमेयं, तुल्यशब्द: उपमावाचक: । साधारणधर्म: (कान्ति:) न वर्तते । अत: धर्मलुप्ता ।

मम दृशो: कर्पूरन्ती तन्वी आसीत् सा । कर्पूरमिवाचरन्ती इत्यर्थ: विवक्षित: । कर्पूर: उपमानं, तन्वी उपमेयञ्च । किन्तु नेत्रानन्दरूपो धर्म: इवशब्द: च नोपात्त: । अत: धर्मवाचकलुप्ता ।

कान्त्या स्मरवधूयन्ती इत्यत्र शोभया स्मरवधूं रतीमिव वर्तमाना इत्यर्थ: विवक्षित: । अत्रोपमेय: न वर्तते । वाचकशब्दोऽपि न । स्मरवधूः उपमानं, कान्तिमत्त्वं साधारणधर्मश्च वर्तते । अत: वाचकोपमेयलुप्ता ।

तत्र (विजने स्थले) मे तद्रते: लाभ: इति यत् तदवितर्कितसम्भवं (याद्दच्छिकं), तदेतत् काकतालीयमेव। काकागमनमिव तालपतनमिव काकतालम्। तत: काकतालमिव काककृत: तालोपभोग: इवेत्यर्थ: विवक्षित:। अत्र तन्वीसुरतलाभ: उपमेयम्। अवितर्कितसम्भवत्वं साधारणधर्म:। काकतालीयम् इत्यत्र साद्दश्यवाचकत्वम्। अत्र उपमानलोप:। अत: उपमानलुप्ता।

तत्र मम तया मेलनं - मम तत्र गमनं तस्या: तत्रागमनं च अवितर्कितसम्भवम्। मम तन्मेलनं काकागमनतालपतनसद्दशं अवितर्कितसम्भवम्। मम तत्समागम: उपमेयम्। याद्दच्छिकत्वं साधारणधर्म:। अत्र वाचकस्योपमानस्य च लोपात् वाचकोपमानलुप्ता।

अवितर्कितसम्भवम् इत्यस्य स्थाने "इति जानीहि हे सखे" इति पाठे साधारणधर्मस्य लोप:। मे तद्रते: लाभ: इति यत् तदेतत् काकतालीयम्। अत: धर्मोपमानलुप्ता।

मम तया तत्र मेलनमिति यत् तदेतत्काकतालीयमिति। काकागमनतालपतनसद्दशम्। अत: धर्मोपमानवाचकलुप्ता।

## पुनरावृत्तिः (Recap)

- उपमीयते इति उपमा।
- उपमा यत्र साद्दश्यलक्ष्मीरुल्लसति द्वयो:।
- उपमाया: चत्वारोऽवयवा: सन्ति।
- उपमानम्, उपमेयं, साधारणधर्म:, उपमावाचक: चेति।
- उपमा द्विविधा - पूर्णा लुप्ता चेति।
- यत्र चतुर्णामपि अवयवानाम् उपादानं तत्र पूर्णोपमा।
- वर्ण्यस्य (उपमेयस्य), उपमानस्य, साधारणधर्मस्य, उपमावाचकस्य च मध्ये एकस्य, द्वयो:, त्रयाणां वा अनुपादाने (अप्रयोगे) लुप्तोपमा।

- लुप्तोपमा अष्टधा।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. उपमा नाम किम् ?
2. उपमा कतिविधा ?
3. उपमायाः कति अवयवाः सन्ति?
4. उपमायाः एकमुदाहरणं लिखत।
5. हंसीव कृष्ण, ते कीर्तिः स्वर्गङ्गामवगाहते - अस्मिन् उदाहरणे उपमेयं किम्?
6. प्रसिद्धं वस्तु किम् ?
7. अप्रसिद्धं वस्तु किम् ?
8. सादृश्यं नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. का नाम पूर्णोपमा ?
2. का नाम लुप्तोपमा?
3. उपमायाः अवयवाः के?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. पूर्णोपमां विशदयत।

2. लुप्तोपमां विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

उपमां तद्भेदान् च विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. उपमीयते इति उपमा।
2. द्विविधा।
3. चत्वारः।
4. हंसीव कृष्ण, ते कीर्तिः स्वर्गङ्गामवगाहते।
5. कीर्तिः।
6. उपमानम्।
7. उपमेयम्।
8. धर्मगतसमानता।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 2
# प्रतीपम्

## उद्देश्यानि (Learning Outcomes)

- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।
- प्रतीपमलङ्कारस्य विशेषतां भेदान् च अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति न्यायात् सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः सन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः। अस्मिन् पाठभागे प्रसिद्धं प्रतीपमलङ्कारं तस्य भेदान् च पठामः।

## मुख्यपदानि (Keywords)

उपमानस्योपमेयत्वप्रकल्पनम्, वर्ण्यस्यानादरः , तथान्यस्याप्यनादरः, अनिष्पत्तिवचः, कैमर्थ्यम्।

## Discussion

### प्रतीपम्

प्रसिद्धोपमानोपमेयभावप्रातिलोम्यं प्रतीपम्। प्रतीपम् इत्यस्य वैपरीत्यकल्पनम्। प्रतीपं पञ्चधा।

### 3.2.1 प्रथमं प्रतीपम् -

**प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।**

**त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः॥**

प्रसिद्धस्य उपमानस्य उपमेत्वप्रकल्पनं प्रथमं प्रतीपं नाम अलङ्कारः।

**त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।**

इत्युदाहरणे हे सुन्दरि! पद्मं तव लोचनसदृशं भवति, विधुः तव वक्त्रसदृशः भवति। अत्र प्रसिद्धयोः उपमानयोः पद्मचन्द्रयोः उपमेयत्वकल्पनात् प्रथमं प्रतीपं नाम अलङ्कारः।

### अपरमुदाहरणम्

**यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं**
**मेघैरन्तरितः प्रिये तवमुखच्छायानुकारी शशी।**
**येऽपि त्वद्गमनानुसारि गतयस्ते राजहंसा गताः**
**त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥**

प्रेषितस्य प्रियां प्रति वियोगवेदनामिदम् । अयि प्रिये! त्वदीयसादृश्येन विनोदनं विनोदो विरहयापनं तन्मात्रमपि मम देवेन न क्षम्यते। तव नेत्रयोः समाना साधारणी कान्तिः शोभा यस्य तथाविधं यदिन्दीवरं तत् सलिले मग्नम्। वर्षहेतुना जलवृद्धेः। तव मुखस्य छायया कान्त्या अनुकारि दृश्यतः शशी मेधैरन्तरितस्ति रोहितः। तव गमनसदृशगतयो ये राजहंसाः तेऽपि गता इति। अत्र प्रसिद्धोपमानाम् इन्दीवरशशिराजहंसानामुपेयत्वकल्पनात्। कान्त्यादि साधारणधर्माणां अत्र उपादानमस्तीति पूर्वस्माद् वैलक्षण्यम्।

### 3.2.2 द्वितीयं प्रतीपम् -

**अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्**

**अलं गर्वेण ते वक्त्र कान्त्या चन्द्रो भवादृशः।।**

प्रसिद्धस्य उपमानस्य उपमेयत्व स्वीकारेण वर्ण्यस्य अनादरः यत्र वर्ण्यते तत्र द्वितीयं प्रतीपं नाम अलङ्कारः।

**अलं गर्वेण ते वक्त्र कान्त्या चन्द्रो भवादृशः।**

इत्युदाहरणे हे वक्त्र! ते तव गर्वेणालं, गर्वो मास्तु, यतः कान्त्या गुणेन चन्द्रोऽपि भवादृशस्त्वतुल्योऽस्ति। अत्र प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण वर्ण्यस्य मुखस्य अनादरवर्णनात् द्वितीयं प्रतीपं नाम अलङ्कारः।

**अपरमुदाहरणम् -**

**गर्वमसंवाह्यमिमां लोचनयुगलेन किं वहसि भद्रे।**
**सन्तीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि।।**

उक्तरीत्योपमानतिरस्कारातिशयप्रतीतिरिति भावः। असंवाह्यं संवनायोग्यम्। अपरिमितमिति यावत्। भद्रे शोभने इति संबोधनम्। नन्विति हेत्वर्थे। अत्र नीलनलिनानामुपमेयत्वं प्रकल्प्य लोचनयुगलस्य वर्ण्यस्य गर्वो मास्तु त्वयानादरो दर्शितः। साधारणधर्मस्तु नोपत इति पूर्वोदाहरणात् भेदः।

### 3.2.3 तृतीयं प्रतीपम्

**वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः।**
**कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः।।**

प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण अवर्ण्यस्य अनादरः यत्र वर्ण्यते तत्र तृतीयं प्रतीपं नाम अलङ्कारः। उत्कृष्टगुणतयान्यदुपमेयमसहमानस्यावर्ण्यस्य वर्ण्यमुपमेयं प्रदर्श्यानादरोऽपि प्रतीपभेद इत्यर्थः।

**कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः।**

इत्युदाहरणे हे मृत्यो! ते क्रूरतागर्वेणालं, तव गर्वो मास्तु, (क्रौर्ये) त्वत्तुल्याः स्त्रियः सन्ति। अत्र प्रसिद्धस्य उपमानस्य उपमेयत्व (क्रूरस्त्रियः) स्वीकारेण अवर्ण्यस्य मृत्योः अनादरवर्णनात् तृतीयं प्रतीपम्।

**अपरमुदाहरणम् -**

**अहमेव गुरुः सुदारुणानामिति हालाहाल ! मास्म तात ! दृप्यः।**
**ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम्।।**

सुदारुणानाम् अतितीव्राणाम्। गुरुः श्रेष्ठः। तात इति सानुकम्पसंबोधने। मास्म दृप्य इति। दर्पं मा कृथा इत्यर्थः। अत्र दारुणता विषये हलाहलतुल्यदुर्जनवचनरूपोपमेयलाभेन अवर्ण्यस्य हालहलस्य अनादर इति तृतीयं प्रतीपम्।

### 3.2.4 चतुर्थं प्रतीपम्

**वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्।**
**मुधापवादो मुग्धाक्षि त्वन्मुखांभं किलांम्बुजम्।।**

प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण उपमानोपमोययोः अनादरवर्णनं चतुर्थं प्रतीपम्।

**मुधापवादो मुग्धाक्षि त्वन्मुखांभं किलांम्बुजम्।**

इत्युदाहरणे वर्ण्येन मुखादिना अन्यस्यावर्ण्यस्य चन्द्रादेः (उपमेयत्वेन कल्पितस्य) उपमाया सादृश्यस्यानिष्पत्तिवचनं यत्तत्पूर्वभ्योऽप्युत्कर्षशालि चतुर्थं प्रतीपम् । 'हे मुग्धाक्षि अम्बुजं त्वन्मुखाभं त्वन्मुखतुल्यशोभं, (किलेति वार्तायाम्) इति वार्ता मुधापवादः असत्यो जनप्रवादः, इत्युदाहरणम् । अत्र अम्बुंजस्य प्रसिद्धोपमानस्य तन्वीमुखेनोपमेये सादृश्यस्यानिष्पत्तिः 'मुधापवाद' इत्यनेनोक्त इति लक्षणसमन्वयः।

### अपरमुदाहरणम्

**आकर्णय सरोजाक्षि वचनीयमिदं भुवि।**
**शशाङ्कस्तव वक्रेण पामरैरुपमीयते।**

अत्र वक्रेण शशाङ्कस्य सादृश्यं पामरैः एव उच्यते, तच्च वचनीयमित्यनेन सादृश्यस्यानिष्पत्तिरेव प्रकाश्यते।

### 3.2.5 पञ्चमं प्रतीपम्

**प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते।**
**दृष्टं चेद्वदनं तन्व्याः किं पद्मेन किमिन्दुना ॥**

प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण उपमानस्य निष्प्रयोजनं वर्णनम् पञ्चमं प्रतीपम्।

**दृष्टं चेद्वदनं तन्व्याः किं पद्मेन किमिन्दुना ॥**

इत्युदाहरणे उपमानस्य चन्द्रादेः कैमर्थ्यं निरर्थकत्वकथनं (तुल्यगुणोपमेयलाभाद्धेतोः) पञ्चमं प्रतीपम् । तन्व्याः वदनं दृष्टं चेत् पद्मेन इन्दुना वा किम्? किमपि प्रयोजनं नास्तीत्यर्थः। अत्र तुल्यगुणोपमेयस्य मुखस्य लाभात् प्रसिद्धोपमानयोः पद्मचन्द्रयोनिष्प्रयोजनत्वं दर्शितमिति लक्षणसमन्वयः। कः अर्थः प्रयोजन अस्येति किमर्थः, तस्य भावः कैमर्थ्यम्।

### अपरमुदाहरणम्

**तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।**
**तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि॥**

नैषधीये नैषधवर्णनमिदम् । विधिर्ब्रह्मा तस्य नलस्य औजसः प्रतापस्य तद् यशसश्च स्थितौ सत्यामिमौ सूर्यचन्द्रौ वृथा प्रतापज्योत्स्नादेः कार्यस्य ताभ्यामेवोपपत्तेर्निरर्थकाविति चित्ते यदा यदा कुरुते तदा

भानोर्विधोश्च परिवेषस्य परिधेः कैतवाच्छलात्कुण्डलनां वैयर्थ्यसूचिकां रेखावेष्टनां करोतीत्यन्वयः । अत्र नलौजसः यशसश्च स्थितौ सत्यां सूर्यचन्द्रौ वृथेति प्रसिद्धोपमानयोः सूर्यचन्द्रयोः कौमर्थ्योक्तेः पञ्चमं प्रतीपम्।

## पुनरावृत्तिः (Recap)

- प्रसिद्धस्य उपमानस्य उपमेत्वप्रकल्पनं प्रथमं प्रतीपं नाम अलङ्कारः।
- त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः इति प्रथमस्य प्रतीपस्योदाहरणम्।
- प्रसिद्धस्य उपमानस्य उपमेयत्वास्वीकारेण वर्ण्यस्य अनादरः यत्र वर्ण्यते तत्र द्वितीयं प्रतीपं नाम अलङ्कारः।
- अलं गर्वेण ते वक्त्र कान्त्या चन्द्रो भवादृशः इति द्वितीयस्य प्रतीपस्योदाहरणम्।
- प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण अवर्ण्यस्य अनादरः यत्र वर्ण्यते तत्र तृतीयं प्रतीपम्।
- कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः इति तृतीयस्य प्रतीपस्योदाहरणम्।
- प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण उपमानोपमोययोः अनादरवर्णनं चतुर्थं प्रतीपम्।
- मुधापवादो मुग्दधाक्षि त्वन्मुखांभं किलांम्बुजम् इति चतुर्थस्य प्रतीपस्योदाहरणम्।
- प्रसिद्धस्य उपमानस्य उपमेयत्वस्वीकारेण उपमानस्य निष्प्रयोजनं वर्णनम् पञ्चमं प्रतीपम्।
- दृष्टं चेद्वदनं तन्व्याः किं पद्मेन किमिन्दुना इति पञ्चमस्य प्रतीपस्योदाहरणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. प्रतीपम् इत्यस्य कोऽर्थः?
2. अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् - कः अलङ्कारः?
3. कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः - कस्य अलङ्कारस्य उदाहरणमिदम्?
4. वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत् - अत्र कः अलङ्कारः?
5. दृष्टं चेद्वदनं तन्व्याः किं पद्मेन किमिन्दुना - कस्य अलङ्कारस्य उदाहरणमिदम्?

6. कैमर्थ्यं इत्यस्य कोऽर्थः ?
7. वर्ण्यवस्तु किम् ?
8. अवर्ण्यवस्तु किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. प्रथमस्य प्रतीपमलङ्कारस्य लक्षणं किम् ?
2. द्वितीयस्य प्रतीपमलङ्कारस्य एकमुदाहरणं लिखत?
3. तृतीयस्य प्रतीपमलङ्कारस्य लक्षणं किम् ?
4. चतुर्थस्य प्रतीपमलङ्कारस्य लक्षणं किम् ?
5. पञ्चमस्य प्रतीपमलङ्कारस्य एकमुदाहरणं लिखत?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. 'कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः'। अत्र कः अलङ्कारः? लक्षणसमन्वयं कुरुत।
2. 'अलं गर्वेण ते वक्त्र कान्त्या चन्द्रो भवादृशः'। अत्र कः अलङ्कारः? लक्षणसमन्वयं कुरुत।
3. चतुर्थस्य प्रतीपमलङ्कारस्य लक्षणम् उदाहरणसहितं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. प्रतीपमलङ्कारं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. वैपरीत्यकल्पनम्।
2. द्वितीयं प्रतीपम्।
3. तृतीयस्य प्रतीपस्योदाहरणम्
4. चतुर्थं प्रतीपम्।
5. पञ्चमस्य प्रतीपस्योदाहरणम्।
6. निष्प्रयोजनकथनम्।
7. उपमेयम्।
8. उपमानम्।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपारव्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्यारव्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 3
# उत्प्रेक्षा

## उद्देश्यानि (Learning Outcomes)

- उत्प्रेक्षालङ्कारस्य विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

रमणीयार्थप्रातिपदिकः शब्दः काव्यं इति जगन्नाथः। कवयः साहित्यस्य निर्माणाय प्रयतन्ते। परन्तु अज्ञातपूर्वतया एव साहित्ये अलङ्काराणाम् आत्मप्रकाशो भवति। यथा विश्वस्य प्राचीनतमे ऋक्संहितायाम् ऋषयः अज्ञातपूर्वतया एव अलङ्काराणां प्रयोगं कृतवन्तः। शब्दवैचित्र्येण अर्थवैचित्र्येण च अलंकारः द्विविधः। अर्थालङ्कारे अर्थस्य प्राधान्यं दृश्यते। यतो हि अर्थवशादेव काव्ये लोकोत्तरचमत्कारः उत्पद्यते। तेन काव्यम् अत्यन्तं रमणीयं भवति। तत्रापि बहुविधः अर्थालङ्कारः विद्यते। तेषु अर्थालङ्कारेषु सादृश्यमूलकः अलङ्कारो भवति उत्प्रेक्षा। अप्पय्यदीक्षितस्य कुवलयानन्दात् उत्प्रेक्षालङ्कारस्य वैशिष्ट्यं तद्भेदान् च पठामः।

## मुख्यपदानि (Keywords)

उत्प्रेक्षते, संभावना, वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा, फलोत्प्रेक्षा, उक्तविषया, अनुक्तविषया, सिद्धविषया असिद्धविषया।

## Discussion

### उत्प्रेक्षा।

उत्प्रेक्षते इत्युत्प्रेक्षा।

**सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।**

**उक्तानुक्तास्पदाद्यत्र सिद्धासिद्धास्पदे परे।।**

सम्भावना उत्प्रेक्षा स्यात्। निश्चयभिन्नं संशयभिन्नं च ज्ञानं संभावना इत्युच्यते। अन्यधर्मसम्बन्धेन अन्यस्यान्यतादात्म्यं सम्भावनम्। उत्कटैककोटिक: संशय: सम्भावना इति केचित्। उत्प्रेक्षा त्रिविधा - वस्तूत्प्रेक्षा (स्वरूपोत्प्रेक्षा), हेतूत्प्रेक्षा, फलोत्प्रेक्षा चेति।

वस्तुन: कस्यचित् वस्त्वन्तरतादात्म्यसम्भावना वस्तूत्प्रेक्षा। (अवस्तु वस्तु कल्पयति) अहेतो: हेतुभावेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा। अफलस्य फलत्वेन सम्भावना फलोत्प्रेक्षा।

वस्तूत्प्रेक्षा उक्तविषया अनुक्तविषया इति द्विविधा। हेतूत्प्रेक्षा फलोत्प्रेक्षा च सिद्धविषया असिद्धविषया चेति प्रत्येकं द्विविधे। एवं षड्विधास्ति उत्प्रेक्षा।

### 3.3.1 वस्तूत्प्रेक्षा

अवस्तुः वस्तुत्वेन उत्प्रेक्ष्यते चेत् वस्तूत्प्रेक्षा।

### 3.3.1 .1 उक्तविषया वस्तूत्प्रेक्षा।

**धूमस्तोमं तम: शङ्के कोकीविरहशुष्मणाम्।**

इदम् अन्धकारं चक्रवाकस्त्रीणां विरहाग्निनां धूमपटलम् इति अहं तर्कयामि। अत्र अन्धकारात्मकं वस्तु कोकीविरहाग्नीनां धूमपटलेन वस्त्वन्तरतादात्म्यतया उक्तत्वात् वस्तूत्प्रेक्षा। तम: धूमस्तोमं शङ्के इति तमसो विषयस्योक्तत्वात् उक्तविषया। शङ्के इत्युत्प्रेक्षाद्योतकः शब्दः। एवं मन्ये, ध्रुवं, प्राय:, नूनम्, इव इत्यादयोऽपि उत्प्रेक्षाद्योतका:।

### अपरमुदाहरणम् -

**बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि ।**

**सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ।।**

सहसा वसन्तसमागमेन वनस्थलीनां नखक्षतानि इव, बालेन्दुवक्राणि अविकासभावात् अतिलोहितानि पलाशानि शुशुभिरे ।

अत्र पलाशमुकुलानां वक्रत्वात् लोहितत्वात् च तेषां नखक्षतानि इव भासमानता इति उत्प्रेक्ष्यमाणत्वात् (अवस्तुनि वस्तुकल्पनात्) वस्तूत्प्रेक्षा । उपमेयभूतानां पलाशानां उक्तत्वात् उक्तविषया ।

### 3.3.1 .2 अनुक्तविषया वस्तूत्प्रेक्षा ।

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।**

अवस्तु वस्तु कल्पयति चेत् वस्तूत्प्रेक्षा । लिम्पतीव तमः इत्युदाहरणम् । अन्धकारः अङ्गानि लेपनं करोति इव आकाशः अञ्जनं वर्षति इव। तमोव्यापनं सकलवस्तुमलिनीकरणेन अञ्जनलेपनमिव अञ्जनवर्षमिव उत्प्रेक्ष्यमाणत्वात् वस्तूत्प्रेक्षा । तमोव्यापनस्य अनुक्तत्वात् अनुक्तविषया च ।

### अपरमुदाहरणम् –

**पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।**

**तदादाय करैरिन्दुः लिम्पतीव दिगङ्गनाः ।।**

समुद्रः तरङ्गाग्रैः फेनचन्दनं पिनष्टि इव (प्रेषणं करोति) तत् फेनचन्दनम् आदाय चन्द्रः किरणैः दिगङ्गनाः लिम्पति इव (लेपनं करोति) अत एव दिशां धवलीकरणम्। समुद्रात् उत्थितस्य चन्द्रस्य किरणानां दिक्षु व्यापनं फेनचन्दनकृतेन लेपनत्वेन उत्प्रेक्ष्यते इत्यतः वस्तूत्प्रेक्षा। फेनचन्दनस्य व्यापनस्यानुक्तत्वात् अनुक्तविषयता च।

### 3.3.2 हेतूत्प्रेक्षा ।

अहेतुं हेतुत्वेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा।

### 3.3.2.1 सिद्धविषया हेतूत्प्रेक्षा

**रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणात् ध्रुवम्।**

तव मृदुलौ चरणौ भुवि सञ्चरणात् हेतोः रक्तवर्णौ। अत्र भुवि विक्षेपणं पादयोः रक्तवर्णस्य हेतुत्वेनोत्प्रेक्ष्यते इत्यतः हेतूत्प्रेक्षा। पादयोः रक्तवर्णस्य स्वतःसिद्धत्वात् भुवि विक्षेपणं तत्र न हेतुः। ततोऽपि पादविक्षेपणेनापि तत् सिद्ध्यतीत्यतः सिद्धविषया हेतूत्प्रेक्षा।

**अपरमुदाहरणम् -**

**रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः।**
**भूमौ प्रतापयशसी सृष्टवान् सततोदिते।।**

राज्ञः प्रतापं यशसं चाधिकृत्य वर्णयति। रात्रौ सूर्यस्य, दिवा चन्द्रस्य चाभावात् स प्रभुः भूमौ सततोदिते प्रतापयशसी सृष्टवान्। अत्र राज्ञः प्रतापयशसोः हेतुः रात्रौ सूर्याभावः, दिवा चन्द्राभावश्च न। अहेतुं हेतुत्वेन उत्प्रेक्षणात् हेतूत्प्रेक्षा। अत्र कविभावनया प्रतापयशसोः सृष्टिः स्वतःसिद्धत्वात् सिद्धविषया च।

### 3.3.2.2 असिद्धविषया हेतूत्प्रेक्षा।

**त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।**

सुन्दर्याः मुखं वर्णयति। हे सुन्दरि! चन्द्रः तव मुखस्य सौन्दर्यं लब्धुमिच्छया कमलैः सह वैरं करोति। अत्र चन्द्रपद्मयोः विरोधे स्वाभाविकेऽपि, तत्र तन्वीमुखकान्तिलाभेच्छा हेतुत्वेन उत्प्रेक्ष्यते इत्यतः हेतूत्प्रेक्षा। चन्द्रस्य कान्तामुखकान्तिलिप्सायाः अप्रसिद्धत्वात् असिद्धविषयता च।

**अपरमुदाहरणम् -**

**विवस्वताऽनायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम्।**
**गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः।।**

अन्धकारं वर्णयति। विवस्वता, सूर्येण स्वकिरणैः साकं मिश्रिताः जनानां नेत्रापरनामधेया गावोऽपि नीता इव। तेन इदं आन्ध्यं, न तु अन्धकारैः। अत्र नेत्रापरनामधेयाः गावः सूर्यकिरणैः साकमगच्छन् इति अहेतुं हेतुत्वेन उत्प्रेक्षणात् हेतूत्प्रेक्षा। सूर्येण जनानां नेत्रगमनस्य असिद्धत्वात् असिद्धविषया।

### 3.3.3 फलोत्प्रेक्षा।

अफलं फलत्वेनोत्प्रेक्ष्यते चेत् फलोत्प्रेक्षा।

#### 3.3.3.1 सिद्धविषया फलोत्प्रेक्षा।

**मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः।**

हे सुन्दरि! तव मध्यः किमर्थं कनकदामभिः बद्धः? स्तनयोः धृत्यै - धारणाय - किम्? अत्र कनकदामबन्धनस्य फलं कुचधारणमिति उत्प्रेक्ष्यते। मध्यः स्वयमेव कुचौ धरति, तत् कनकधामबन्धनफलतया न। अतः फलोत्प्रेक्षा। कुचधारणस्य सिद्धत्वात् सिद्धविषया।

**अपरमुदाहरणम्-**

**परं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति।**
**पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति।।**

चन्द्रोदये समुद्रबृंहणं वर्णयति। समुद्रं वर्धयितुमिव अयं चन्द्रः चन्द्रकान्तमणिं द्रावयति। प्रियवियोगे कोकीनयनेभ्यः अश्रूणि दोग्धि। चन्द्रकान्तमणेः द्रावणं, कोकीनयनयोः अश्रुवर्षणं च समुद्रवर्धनरूपं फलमुद्दिश्य न भवति। तथापि तत्फलमुद्दिश्य इव इति वर्णनात् फलोत्प्रेक्षा। चन्द्रोदये समुद्रबृंहणस्य स्वाभाविकत्वात् सिद्धविषया।

#### 3.3.3.2 असिद्धविषया फलोत्प्रेक्षा।

**प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।**

कान्तायाः पादं वर्णयति। प्रायः कमलं तव पादेन ऐक्यं प्राप्तुं जले तपस्यति। अत्र जलजस्य जलस्थितिः स्वाभाविकैव। तत्फलं तु कान्तायाः पादेन ऐक्यप्राप्तिर्न। तथापि कामिनीपादसायूज्यप्राप्तिरूपं फलमिच्छन्ति कल्पनात् फलोत्प्रेक्षा। पद्मस्य जलस्थितेः स्वाभाविकत्वात् सिद्धविषया।

**अपरमुदाहरणम् –**

**रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।**
**उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्।**

सूर्यस्य उत्तरदिग्गमनं वर्णयति कविः। रथस्थितानां पुरातनानाम् अश्वानां परिवर्तनाय इव अश्वोत्तमानाम् उत्पत्तिभूमौ उत्तरस्यां दिशि सूर्यः स्थितिं चकार। अत्र सूर्यस्योत्तरदिग्गमनं रथस्थितानां पुरातनानाम् अश्वानां परिवर्तनफलाय इति उत्प्रेक्ष्यमाणत्वात् फलोत्प्रेक्षा। अश्वपरिवर्तनस्यासिद्धत्वात् असिद्धविषया।

## पुनरावृत्तिः (Recap)

- उत्प्रेक्षते इति उत्प्रेक्षा।
- सम्भावना स्यात् उत्प्रेक्षा।
- उत्प्रेक्षा त्रिविधा।
- वस्तूत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चेति।
- अवस्तु वस्तुत्वेन उत्प्रेक्ष्यते चेत् वस्तूत्प्रेक्षा।
- अहेतुं हेतुत्वेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा।
- अफलं फलत्वेनोत्प्रेक्ष्यते चेत् फलोत्प्रेक्षा।
- वस्तूत्प्रेक्षा उक्तविषया अनुक्तविषया इति प्रत्येकंद्विविधा।
- हेतूत्प्रेक्षा फलोत्प्रेक्षा च सिद्धविषया असिद्धविषया चेति द्विविधा।
- उत्प्रेक्षा षड्विधास्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. किं नाम उत्प्रेक्षा ?
2. किं नाम फलोत्प्रेक्षा ?
3. वस्तूत्प्रेक्षा कति विधास्ति?
4. किं नाम हेतुत्प्रेक्षा ?
5. धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् । अत्र अलङ्कारः कः?
6. लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।अत्र अलङ्कारः कः?
7. असिद्धविषया फलोत्प्रेक्षायाः एकमुदाहरणं लिखत।
8. सिद्धविषया हेतूत्प्रेक्षायाः एकमुदाहरणं लिखत।

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. उत्प्रेक्षा कति विधास्ति ? ताः काः ?
2. असिद्धविषया हेतूत्प्रेक्षयाः एकमुदाहरणं लिखत।
3. फलोत्प्रेक्षा कति विधा ? ताः काः ?
4. हेतुत्प्रेक्षा कति विधा ? ताः काः ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति। अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।
2. मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।

3. त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी। कस्य अलङ्कारस्य उदाहरणमिदम् ? लक्षणसहितं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. उत्प्रेक्षां सभेदान् च विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. उत्प्रेक्षा सम्भावना स्यात्।
2. अफलं फलत्वेन उत्प्रेक्ष्यते चेत् फलोत्प्रेक्षा।
3. द्विविधा।
4. अहेतुं हेतुत्वेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा।
5. उक्तविषया वस्तूत्प्रेक्षा।
6. अनुक्तविषया वस्तूत्प्रेक्षा।
7. प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।
8. रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणात् ध्रुवम्।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 4
# रूपकम्

## उद्देश्यानि (Learning Outcomes)

- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।
- रूपकालङ्कारस्य विशेषतां भेदान् च अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति न्यायात् सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः सन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः। अस्मिन् पाठभागे प्रसिद्धं रूपकालङ्कारं तस्य भेदान् च पठामः।

## मुख्यपदानि (Keywords)

विषयी, विषयः, अभेदरूपकम्, ताद्रूप्यरूपकम्, अनुभयाभेदरूपकम्, न्यूनाभेदरूपकम्, अधिकाभेद रूपकम्, अनुभयताद्रूप्यरूपकम्, न्यूनताद्रूप्यरूपकम्, अधिकताद्रूप्यरूपकम्।

## Discussion

### रूपकम्

निषेधरहिते विषये उपमेये रूपितस्य यत्र उपमानस्य अभेदारोपः तत्र रूपकम्। उपमानेन उपमेयस्य उपरञ्जनमेव अस्य अलङ्कारस्य प्रामुख्यम्।

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः।**

विषयिणो रूपेण विषयस्य अभेदताद्रूप्याभ्यां रञ्जनं स्वोपरक्तबुद्धिविषयीकरणं रूपकम् । ततश्च रूपकम् द्विविधम् । विषयस्य यत् विषय्यभेदत्वं तत् अभेदरूपकम् । विषयस्य यत् विषयीताद्रूप्यरञ्जनं तत् ताद्रूप्यरूपकम्। तद्विधमपि विषय्यपेक्षया विषयस्याधिक्योक्त्या न्यूनत्वक्त्या अनुभयोक्त्या च प्रत्येकं त्रिविधम्।

तथा च रूपकं षड्विधम् - अनुभयाभेदरूपकम्, न्यूनाभेदरूपकम्, अधिकाभेदरूपकम्, अनुभयताद्रूप्यरूपकम्, न्यूनताद्रूप्यरूपकम्, अधिकताद्रूप्यरूपकम्।

### 3.4.1अनुभयाभेदरूपकम्

**अयं हि धूर्जटिः साक्षाद्येन दग्धः पुरः क्षणात्**

अयं पुरोवर्ति राजा साक्षात् शिवः एव। तेन शत्रुनगराणि दग्धानि। अत्र शत्रुनगरभस्मीकरणकार्ये उपमेयस्य राज्ञः उपमानस्य शिवस्य च अभेदकल्पनात् अभेदरूपकम्। उपमेयस्य राज्ञः अधिक्यन्यूनत्ववर्णनाभावात् अनुभयाभेदरूपकम्।

**अपरमुदाहरणम् -**

**चन्द्रज्योत्स्नाविशदपुलिते सैकतेऽस्मिन् सरय्वाः**
**वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित्।**
**एको वक्ति प्रथमनिहतं कैटभं, कंसमन्यः**
**तत्त्वं स त्वं कथय भगवन्! को हतस्तत्र पूर्वम्॥**

राजानं प्रति कस्यचित् उक्तिः। अत्र 'स त्वं' इत्यनेन कंसकैटभहन्तृगरुडध्वजाभेदो वर्णनीयस्य प्रतिपाद्यते। कंसकैटभवधयोश्च पौर्वापर्यप्रश्नव्याजेन तदभेद एव दृढी क्रियते, न पुनर्न्यूनता आधिक्यं वा प्रतिपाद्यत इत्यनुभयाभेदरूपकम्।

### 3.4.2 न्यूनाभेदरूपकम्

**अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम्।**

अयं राजा तृतीयलोचनरहितः साक्षात् शिवः एव। अत्र उपमेयस्य राज्ञः उपमानस्य शिवस्य च अभेदकल्पनात् अभेदरूपकम्। तृतीयलोचनरहितः इति न्यूनत्ववर्णनात् न्यूनाभेदरूपकम्।

**अपरमुदाहरणम् -**

**वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च।**
**तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः॥**

अत्र विरक्तः साक्षाद्भर्ग इति विरक्तशिवयोरभेदे प्रतिपादिते, नराकृतिरिति विषयस्य दिव्यमूर्तिवैकल्य-प्रतिपादनात् न्यूनाभेदरूपकम्।

### 3.4.3 अधिकाभेदरूपकम्

**शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।**

अयं राजा शिवः। सः समदृष्टितां स्वीकृत्य विश्वं रक्षति। अत्र उपमेयस्य राज्ञः उपमानस्य शिवस्य च अभेदकल्पनात् अभेदरूपकम्। उपमेयस्य राज्ञः अधिक्यवर्णनात् अधिकाभेदरूपकम्।

अपरमुदाहरणम् -

**त्वय्यागते किमिति वेपत एष सिन्धुः**
**त्वं सेतुमन्थकृदतः किमसौ बिभेति।**
**द्वीपान्तरेऽपि न हि तेऽस्त्यवशं वदोऽद्य**
**त्वां राजपुङ्गव ! निषेवत एव लक्ष्मीः॥**

अत्र त्वं सेतुमन्थकृदित्यनेन राजनारायणयोरभेदः प्रतिपादितः। द्वीपान्तराणां वशंवदत्वेन जेतव्याभावात्, प्राप्तलक्ष्मीकत्वेन मन्थनप्रसक्त्यभावाच्च पूर्वावस्थापेक्षया उत्कर्षविभावनादधिकाभेदरूपकम्

### 3.4.4 अनुभयताद्रूप्यरूपकम्

**अस्याः मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना।**

अस्याः मुखेन्दुना लब्धे नेत्रानन्दे चन्द्रेण किं प्रयोजनम्। अत्र उपमानेन चन्द्रेण आनन्दं लब्धे उपमेयं मुखं रञ्जयति इति कारणात् ताद्रूप्यरूपकम्। उपमेयस्य मुखस्य आधिकन्यूनत्ववर्णनाभावात् अनुभयताद्रूप्यरूपकम्।

**अपरमुदाहरणम् -**

**किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं**
**वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम्**
**वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते**
**दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥**

अत्र विषयविषयिणोः मुखचन्द्रयोर्भेदे प्रतीयमानेऽपि वक्त्रेन्दाविति मुखे चन्द्रत्वारोपः चन्द्रकार्यकारित्वमात्रे पर्यवसितः, उत्कर्षापकर्षयोरप्रतिपादनात् च अनुभयताद्रूप्यरूपकम्।

### 3.4.5 न्यूनताद्रूप्यरूपकम्

**साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।**

क्षीरसमुद्रात् अनुत्पन्ना इयं पतिव्रता अपरा लक्ष्मीः एव। अत्र अपरालक्ष्मीः इति कथनात् ताद्रूप्यरूपकम्। समुद्रात् अनुत्पन्ना इति न्यूनत्ववर्णनात् न्यूनताद्रूप्यरूपकम्।

**अपरमुदाहरणम् -**

**अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।**
**अफाललोचनः शम्भुर्भगवान् बादरायणः॥**

अत्र ब्रह्मादिभिर्वाबदरायणस्य भेदप्रतीतेः ताद्रूप्यरञ्जनम्। अचतुर्वेदनेत्यादिना न्यूनता अपि उक्तेति न्यूनताद्रूप्य रूपकम्।

### 3.4.6 अधिकताद्रूप्यरूपकम्

**अयं कलङ्किनचन्द्रान्मुखचन्द्रोऽतिरिच्यते।**

अयं मुखचन्द्रः यथार्थचन्द्रम् अतिशयेन शोभते। अत्र उपमाने चन्द्रे या शोभा वर्तते तां शोभामेव उपमेयमुखं रञ्जयति तस्मात् ताद्रूप्यरूपकम्। उपमेयस्य मुखस्य अतिशयेन शोभाकारणात् अधिकताद्रूप्यरूपकम्।

**अपरमुदाहरणम् -**

**किमसुभिर्ग्लपितैर्जड ! मन्यसे मयि निमज्जतु भीमसुतामनः।**
**मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः।।**

अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रः न प्राणनिर्याणकालमनःप्रवेशार्थकश्रुतेः तात्पर्यविषयः, किन्तु नलमुखचन्द्र एवेति प्रसिद्धचन्द्रापेक्षया रूपकम् । नलमुखचन्द्रस्याधिक्य (उत्कर्ष) प्रतिपादनादधिक-ताद्रूप्यरूपकम्।

## पुनरावृत्तिः (Recap)

- निषेधरहिते विषये उपमेये रूपितस्य यत्र उपमानस्य अभेदारोपः तत्र रूपकम्।
- विषयस्य यत् विषय्यभेदत्वं तत् अभेदरूपकम्।
- विषयस्य यत् विषयीताद्रूप्यरञ्जनं तत् ताद्रूप्यरूपकम्।
- द्विधमपि विषय्यपेक्षया विषयस्याधिक्योक्तया न्यूनत्वक्तया अनुभयोक्तया च प्रत्येकं त्रिविधम्।
- रूपकं षड्विधमस्ति।
- अनुभयाभेदरूपकस्य उदाहरणं भवति - अयं हि धूर्जटिः साक्षाद्येन दग्धः पुरः क्षणात्।
- न्यूनाभेदरूपकस्य उदाहरणं भवति - अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम्।
- अनुभयताद्रूप्यरूपकस्य उदाहरणं भवति - अस्याः मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना।
- न्यूनताद्रूप्यरूपकस्य उदाहरणं भवति - साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।
- अधिकताद्रूप्यरूपकस्य उदाहरणं भवति - अयं कलङ्किनचन्द्रान्मुखचन्द्रोऽतिरिच्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. रूपकं नाम किम्?
2. किं नाम अभेदरूपकम्?
3. विषयी किम्?
4. विषयं किम्?
5. किं नाम ताद्रूप्यरूपकम्?

6. अस्याः मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना। अत्र अलङ्कारः कः?
7. अधिकताद्रूप्यरूपकस्य एकमुदाहरणं लिखत।

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. रूपकमलङ्कारस्य लक्षणं लिखत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. अयं हि धूर्जटिः साक्षाद्येन दग्धः पुरः क्षणात्। अत्र अलङ्कारः कः ? विशदयत।
2. न्यूनाभेदरूपकं सोदाहरणं प्रतिपादयत।
3. न्यूनताद्रूप्यरूपकस्य लक्षणसमन्वयं कुरुत।

## निर्दिष्टाभ्यासः (Assignments)

1. रूपकं तद्भेदान् च विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. विषयिणो रूपेण विषयस्य अभेदताद्रूप्याभ्यां रञ्जनं स्वोपरक्तबुद्धिविषयीकरणं रूपकम्।
2. विषयस्य यत् विषय्यभेदत्वं तत् अभेदरूपकम्।
3. उपमानम्।
4. उपमेयम्।

5. विषयस्य यत् विषयीतादूप्यरञ्जनं तत् तादूप्यरूपकम्।
6. अनुभयतादूप्यरूपकम्।
7. अयं कलङ्किनचन्द्रान्मुखचन्द्रोऽतिरिच्यते।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

BLOCK-4

# अलङ्काराः 2

# Unit - 1
# अतिशयोक्तिः(सप्रभेदः)

## उद्देश्यानि (Learning Outcomes)

- अतिशयोक्तेरलङ्कारस्य विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्यशास्त्रं अलङ्कारशास्त्रमित्युच्यते। "काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते" इत्याचार्यदण्डिनो वचनानुसारेण न केवलं शब्दार्थमलङ्काराः अपि तु काव्यशोभाकारिणो गुणरीत्यादयोऽपि अलङ्कार एव। अस्मिन् पाठ्यांशे तु अलङ्कारशब्देन यमकानुप्रासादयः शब्दालङ्काराः उपमोत्प्रेक्षादयोऽर्थालङ्काराश्चैव विवक्ष्यन्ते।

वेदोपकारकत्वात् अलङ्कारशास्त्रस्य सप्तमं वेदाङ्गत्वं वर्तते। साहित्यविद्या पञ्चमीविद्या इत्युच्यते। अलङ्कारशास्त्रे अष्टौ पद्धतयः सन्ति। ताः रस-अलङ्कार-गुण-रीति-ध्वनि-अनुमान-वक्रोक्ति-औचित्यपदैः व्यपदिश्यन्ते। तासु पद्धतिसु भामहादयः अलङ्कारेभ्यः प्राधान्यं कल्पयन्ति। अलङ्कारस्य प्राधान्यम् उद्भटः, रुद्रटः, राजशेखरः, रुय्यकः, जयदेवः, विद्यानाथः, विश्वनाथः, अप्पय्यदीक्षितः इत्यादयोऽलङ्कारनिपुणा अङ्गीकुर्वन्ति। कालिदासप्रभृतयः कवयः अपि स्वस्वकाव्येषु अलङ्काराणां सान्निध्येन भाषां काव्यमण्डलं च समलङ्कृतवन्तः।

अप्पय्यदीक्षितः षोडशे शतके स्वजीवितेन साहित्यनभोमण्डलं प्रशोभयामास। काव्यशास्त्रे तस्य योगदानं समुन्नतमेव। तेन महात्मना चतुरधिकशतमिताः ग्रन्थाः रचिताः। तेषु चित्रमीमांसा, कुवलयानन्दः, वृत्तिवार्तिकञ्च काव्यशास्त्रसम्बद्धाः।

कुवलयानन्दः अर्थालङ्कारसम्बद्धो ग्रन्थः। तस्मिन् १२३ अलङ्काराः निरूपिताः। तेषु ९६ अलङ्काराः जयदेवस्य चन्द्रालोकात् गृहीताः। शेषाः १७ अप्पय्यदीक्षितेन स्वयमेवोद्भाविताः अन्येभ्यो गृहीताः वा। दीक्षितमहाशयेन निरूपितेषु अलङ्कारेषु अतिशयोक्तिः नाम अलङ्कारस्य अध्ययनं अस्मिन् एकके करिष्यामः।

## मुख्यपदानि (Keywords)

निगीर्याध्यवसानतः, अपह्नुतिगर्भत्वं, अन्यत्ववर्णनं, अयोगे योगकल्पनम्, अयोगऽसंबन्धवर्णनम्, सहत्वे हेतुकार्ययोः, कार्ये हेतुप्रसक्तिजे, पौर्वापर्यव्यतिक्रमे।

## Discussion

### अतिशयोक्तिः

अतिशयस्य लोकमर्यादातिवर्तिनः (कविसम्मतस्य) विशेषस्य उक्तिः अतिशयोक्तिः इति।

अतिशयोक्तिरष्टविधा (1) रूपकातिशयोक्तिः, (2) सापह्नवा रूपकातिशयोक्तिः, (3) भेदकातिशयोक्तिः, (4) संबन्धातिशयोक्तिः (5) असंबन्धातिशयोक्तिः, (6) अक्रमातिशयोक्तिः, (7) चपलातिशयोक्तिः, (८) अत्यन्तातिशयोक्तिः इति।

### 4.1.1 रूपकातिशयोक्तिः

**रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।**
**पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः॥**

विषयेण साकं विषयिणः अभेदप्रतीतेः निश्चयात्मके सति अतिशयोक्त्यलङ्कारः। 'पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः' इत्यस्मिन् उदाहरणे हे सखि! नीलोत्पलद्वन्द्वात् शिताः तीक्ष्णाः शराः निस्सरन्ति निर्गच्छन्ति। विषयभूतकान्तालोचनद्वन्द्वकटाक्षाणां तद् वाचिपदैः उपदानं विना विषयिवाचिनीलोत्पलशरशब्दाभ्यामेव उपादानं कृत्वा नीलोत्पलद्वन्द्वबाणाभेदाध्यवसानात् रूपकातिशयोक्तिः।

**रूपकातिशत्तयोः को भेदः**

रूपके विषयविषयिणोः स्वपदोपात्तयोरभेदप्रतिपत्तिः आरोपः। रूपकातिशयोक्तौ तु विषयस्य स्वपदोपादानं विना विषयिवाचिपदेनैव उपादानपूर्वकं विषयविषयिणोराहार्याभेदनिश्चयः अध्यवसायः इत्यनयोर्भेदः। उत्प्रेक्षायामभेदसंभावनैव, न तु निश्चयः। भ्रान्तौ अभेदप्रतितिपत्तिः न आहार्या, किन्तु अन्यथा ग्रहणजन्या इत्येवं भेदः।

**अपरमुदाहरणम्**

> **वापी काचित्स्फुरति गगने तत्परं सूक्ष्मपद्या सोपानालीमधिगतवती काञ्चनीमैन्द्रनीली।**
> **अग्रे शैलौ सुकृतिसुगमौ चन्दनच्छन्नदेशौ तत्रत्यानां सुलभममृतं सन्निधानात्सुधांशोः ॥**

अत्र वापीगगनसूक्ष्मपद्यादिभिः उपमानवाचकशब्दैः नाभि-मध्य-रोमावलिप्रभृतीनि उपमेयानि निगीर्णानि, वाप्यादिरूपेण अध्यवसितानि चेति रूपकातिशयोक्तिः।

### 4.1. 2 सापह्नवा रूपकातिशयोक्तिः

> **यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता।**
> **त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ ॥**

रूपकातिशयेक्तिः एव यदि अपह्नुतिगर्भा निषेधघटिता तर्हि सापह्नवातिशयोक्तिः।

'त्वत्सूक्तिषु सुधा राजन् आन्ताः पश्यन्ति तां विधौ' इत्युदाहरणे हे राजन्! तव सूक्तिषु मधुरवचनेषु सुधा अमृत, वर्तत इति शेषः। भ्रान्ताः अज्ञानिनः उन्मत्ता वा तां सुधां विधो चन्द्रे पश्यन्ति जानन्ति। परमार्थतः चन्द्रे सुधा नास्तीति भावः। अत्र सूक्तिमाधुर्ये सुधात्वाध्यवसानस्य चन्द्रे सुधा नास्तीति निशेषगर्भत्वात् सापह्नवा रूपकातितिशयोक्तिः।

**अपरमुदाहरणम्**

> **मुक्ताविद्रुममन्तरा मधुरसः पुष्पं परं धूर्वहं**
> **प्रालेयद्युतिमण्डले खलु तयोरेकासिका नार्णवे।**
> **तच्चोदञ्चति शङ्खमूर्ध्नि न पुनः पूर्वाचलाभ्यन्तरे**
> **तानीमानि विकल्पयन्ति त इमे येषां न सा दृक्पथे ॥**

अत्र मुक्ताविद्रुमयोः मध्ये मधुरसः, पुष्परसस्तु न मधुरसः मुक्ताविद्रुमौ चन्द्रमण्डले वर्तेते, न तु अर्णवे चन्द्रश्च शङ्खशिरसि उदेति, न पूर्वाद्रिपरिसरे इत्यादौ मुक्ता - विद्रुम - मधुरस - चन्द्रमण्डलशङ्खशब्दैः दन्त - अधर - अधरमाधुर्य - मुख - कण्ठाः निगीर्णाः मुक्तादिरूपेणाध्यवसिताश्च। पुष्पं परं धूर्वहमित्यादौ पुष्परसो न मधुरस इत्येवमादिनिषेधस्य गम्यमानत्वात् सापह्नवा रूपकातिशयोक्तिः।

### 4.1.3 भेदकातिशयोक्तिः

**भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम्।**
**अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः॥**

यत्र लोकप्रसिद्धस्य एव विषयस्य गाम्भीर्यादेः अन्यत्ववर्णनं अभेदेऽपि भेदवर्णनं भेदकातिशयोक्तिः। अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः इत्युदाहरणे अस्य महीपतेः गाम्भीर्यं अन्यदेव, धैर्यं अपि अन्यदेव लोकविलक्षणमेव इत्यत्र गाम्भीर्यधैर्ययोः लोकसाधारणत्वेऽपि (अभेदेऽपि) विलक्षणत्वं (भेदः) वर्णितमिति भेदकातिशयोक्तिः।

### अपरमुदाहरणम्

**अन्येयं रूपसम्पत्तिरन्या वैदग्ध्यधोरणी।**
**नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः॥**

अस्याः सौन्दर्यमन्यदेव। अस्याः वैदग्ध्यमपि अन्यदेव। इयं ब्रह्मणः साधारणी सृष्टिः न। अत्र सौन्दर्यवैदग्ध्ययोः अन्यत्वकल्पनात् भेदकातिशयोक्तिः।

### 4.1.4 संबन्धातिशयोक्तिः

**संबन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्।**
**सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्॥**

अयोगे असंबन्धे सति योगकल्पनं संबन्धवर्णनं यत् सा सम्बन्धातिशयोक्तिः।

'सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्' इत्युदाहरणे अस्य पुरस्य सौधाग्राणि प्रासादशिखराणि विधुमण्डलं चन्द्रमण्डलं स्पृशन्ति इत्यत्र समुन्नतानां सौधशिखराणां वस्तुतः विधुमण्डलस्पर्शासम्बन्धेऽपि तत्सम्बन्धवर्णनात् संबन्धातिशयोक्तिः।

### अपरमुदाहरणम्

**कतिपयदिवसैः क्षयं प्रयायात् कनकगिरिः कृतवासरावसानः**
**इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे ॥**

प्रतापरुद्रे दानशीले सति कतिपयदिवसैः कनकगिरिः क्षयं ययात् विचिन्त्य चक्रवाकी मुदमुपयाति। अत्र सूर्यास्तमयस्य कनकगिरेः क्षययस्य च सम्बन्धाभावेऽपि सम्बन्धकल्पनात् सम्बन्धातिशयोक्तिः।

### 4.1.5 असंबन्धातिशयोक्तिः

**योगेऽप्ययोगोऽसंबन्धातिशयोक्तिरितीर्यते।**
**त्वयि दातरि राजेन्द्र स्वर्दुमान्नाद्रियामहे ॥**

योगे सम्बन्धे सत्यपि अयोगः असंबन्धवर्णनं असंबन्धातिशयोक्तिः इति ईर्यते उच्यते।

'त्वयि दातरि राजेन्द्र स्वर्दुमान्नाद्रियामहे' इत्युदाहरणे हे राजेन्द्र ! त्वयि दातरि वितरणशालिनि सति स्वर्द्रुमान् कल्पवृक्षान् न आद्रियामहे न याचामहे । राज्ञि दानशीले सत्यपि स्वर्द्रुमेषु सर्वेषामादरो भवत्येव। तथा च आदरयोगेऽपि 'न आन्द्रियामहे' इति अयोगकल्पनात् असंबन्धातिशयोक्तिः।

### अपरमुदाहरणम्

**अनयोरनवद्याङ्गि स्तनयोः जृम्भमाणयोः।**
**अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥**

अत्र वर्धमानयोः स्तनयोः पर्याप्तस्य अवकाशस्य बाहुमध्ये सत्वात् तत्संबन्धे सत्यपि 'न पर्याप्त इति असंबन्धवर्णनात् असंबन्धातिशयोक्तिः।

### 4.1.6 अक्रमातिशयोक्तिः

**अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः।**
**आलिङ्गन्ति समं देव ज्यां पराश्च शराश्च ते ॥**

हेतुकार्ययोः कार्यकारणयोः सहत्वे यौगपद्ये (वर्ण्यमाने सति) अक्रमातिशयोक्तिः। कारणं पूर्वं कार्यं तदनन्तरमिति नियममुल्लङ्घ्य हेतुकार्ययोः एककालवर्णनं अक्रमातिशयोक्तिः।

आलिङ्गन्ति समं देव ज्यां पराश्च शराश्च ते इत्युदाहरणे हे राजन् ! तव शराः बाणाः, पराः शत्रवश्च, ज्यां मौर्वीं भूमिं च समं युगपद् आलिङ्गन्ति। अत्र मौर्व्यां शरसन्धानरूपकारणस्य शत्रुणां भूपतनरूपकार्यस्य च सहत्वे अकमातिशयोक्तिः।

**अपरमुदाहरणम्**

**मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिवर्गः।**
**हम्मीरवीरखड्गे त्यजति त्यजति क्षमामाशु॥**

अत्र हम्मीरवीरस्य खड्गः यदा कोशं मुञ्चति, तदैव अरिवर्गः कोशं भाण्डागारं मुञ्चति, यदा खड्गः कम्पते तदैव शत्रवोऽपि कम्पन्ते इत्यादौ कार्यकारणयोः योगपद्यवर्णनाद् अक्रमातिशयोक्तिः।

### 4.1.7 चपलातिशयोक्तिः

**चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे।**
**यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका॥**

कार्ये हेतुप्रसक्तिजे, हेतोः कारणस्य प्रसक्त्या ज्ञानमात्रेण कार्यस्य जननवर्णने चपलातिशयोक्तिरलङ्कारः। 'यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका' इत्युदाहरणे। (नायकेन) उक्ते सति, विरहकारणज्ञानमात्रेण तन्व्याः नायिकायाः ऊर्मिका अङ्गुलीयकं वलयः हस्ताभरणे अभूत्। भविष्यत् विरहरूपकारणस्य ज्ञानमात्रेण तन्व्याः कृशता सञ्जाता यस्मात् अङ्गुलीयकं हस्ताभरणं अभूत् इति कार्योत्पत्तिवर्णनात् चपलातिशयोक्तिः। यास्यामि दूरदेशं गमिष्यामि।

**अपरमुदाहरणम्**

**आदातुं सकृदीक्षितेऽपि कुसुमे हस्ताग्रमालोहितं**
**लाक्षारञ्जनवार्तयापि सहसा रक्तं तलं पादयोः।**
**अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदावहं**
**हन्ताऽधीरदृशः किमन्यदलकामोदोऽपि भारायते॥**

अत्र सहजसौकुमार्यायाः नायिकायाः विरहावस्थायां आदानेच्छया कुसुम ईक्षणमात्रेण हस्ताग्रं लोहितं अभूत्, लाक्षारसवार्तयापि पादतलं रक्तमभूत् इत्यादौ कारणप्रसक्तिमात्रेण कार्योत्पत्तिवर्णनात् चपलातिशयोक्तिः।

### 4.1.8 अत्यन्तातिशयोक्तिः

**अत्यन्तातिशयोक्तिः स्यात्पौर्वापर्यव्यतिक्रमे।**
**अग्रे मानो गतः पश्चादनुनीता प्रियेण सा॥**

कार्यकारणयोः पौर्वापर्यस्य पूर्वोत्तर क्रमस्य व्यतिक्रमे सति अत्यन्तातिशयोक्तिः। पूर्वं कारणं पश्चात् कार्यं इति क्रममुलङ्घ्य कार्योत्पत्तेरनन्तरं कारणसंभववर्णनम् अत्यन्तातिशयोक्तित्यर्थः।

अग्रे मानो गतः पश्चादनुनीता प्रियेण सा इत्युदाहरणे मानः प्रणयकोपः अग्रे प्रथमं गतः, पश्चात् सा नायिका प्रियेण अनुनीता इत्यत्र प्रसिद्धकारणात् अनुनयात् पूर्वमेव कार्यस्य मानत्यागस्योत्पत्तिवर्णनात् (कार्यकारणयोः पौर्वापर्यविपर्ययरूपायाः) अन्तातिशयोक्तिः नाम अलङ्कारः।

**अपरमुदाहरणम्**

**कवीन्द्राणामासन् प्रथमतरमेवाङ्गणभुवः**
**चलद् भृङ्गासङ्गाकुलकरिमदामोद मधुराः।**
**अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः**
**कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः॥**

अत्र प्रथमं कवीनामङ्गणभुवः रुद्रनृपतिदत्तकरिभिः पूर्णाः, तदनन्तरं च नृपतेः कटाक्षाः कवीनामुपरि पतिताः इति कार्यभूतकरिदानानन्तरं कारणभूतकटाक्षपातवर्णनात् अत्यन्तातिशयोक्तिः।

अन्त्याः तिस्रः अक्रमचपलात्यन्तातिशयोक्तयः कार्यकारणक्रमनिबन्धनाः कार्यशैघ्र्यं द्योतयन्ति।

## पुनरावृत्तिः (Recap)

- अतिशयस्य लोकमर्यादातिवर्तिनः (कविसम्मतस्य) विशेषस्य उक्तिः अतिशयोक्तिः इति।
- अतिशयोक्तिः अष्टविधा।
- विषयेण साकं विषयिणः अभेदप्रतीतेः निश्चयात्मके सति रूपकातिशयोक्त्यलङ्कारः।
- रूपकातिशयेक्तिः एव यदि अपह्नुतिगर्भा निषेधघटिता तर्हि सापह्नवा रूपकातिशयोक्तिः।
- यत्र लोकप्रसिद्धस्य एव विषयस्य गाम्भीर्यादेः अन्यत्ववर्णनं अभेदेऽपि भेदवर्णनं भेदकातिशयोक्तिः।
- अयोगे असंबन्धे सति योगकल्पनं संबन्धवर्णनं यत् सा सम्बन्धातिशयोक्तिः।
- योगे सम्बन्धे सत्यपि अयोगः असंबन्धवर्णनं असंबन्धातिशयोक्तिः इति उच्यते।

- हेतुकार्ययोः सहत्वे यौगपद्ये (वर्ण्यमाने सति) अक्रमातिशयोक्तिः।
- कार्ये हेतुप्रसक्तिजे, हेतोः कारणस्य प्रसक्त्या ज्ञानमात्रेण कार्यस्य जननवर्णने चपलातिशयोक्तिरलङ्कारः।
- कार्यकारणयोः पौर्वापर्यस्य पूर्वोत्तरक्रमस्य व्यतिक्रमे सति अत्यन्तातिशयोक्तिः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अतिशयोक्तिः कतिविधा?
2. रूपकातिशशक्तेः लक्षणं लिखत।
3. किं नाम भेदकातिशयोक्तिः?
4. संबन्धातिशयोक्तेः एकमुदाहरणं लिखत।
5. अक्रमातिशयोक्तेः लक्षणं किं भवति ?
6. यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका - कस्य अलङ्कारस्य उदाहरणमिदम्?
7. पौर्वापर्यव्यतिक्रमे स्यात् - अत्र कः अलङ्कारः ?
8. सापह्नवातिशयोक्तेः लक्षणं लिखत।
9. त्वयि दातरि राजेन्द्र स्वर्दुमान्नाद्रियामहे - कस्य अलङ्कारस्य उदाहरणमिदम्?
10. अयोगे योगकल्पनम् - कस्य अतिशयोक्तेः लक्षणमिदम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
## (Answer the following questions in one or two sentences)

1. अतिशयोक्तिः कतिधा ? ताः काः ?
2. रूपकातिशयोक्तिः - सापह्नवा रूपकातिशयोक्त्योः भेदः कः?

3. संबन्ध - असंबन्धातिशयोक्त्योः भेदः कः ?

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. अग्रे मानो गतः पश्चादनुनीता प्रियेण सा - अत्र अलङ्कारः कः? लक्षणसमन्वयं कुरुत ।
2. चपलातिशयोक्तेः उदाहरणसहितं लक्षणं लिखत ।
3. आलिङ्गन्ति समं देव ज्यां पराश्च शराश्च ते - अत्र अलङ्कारः कः? लक्षणसमन्वयं कुरुत ।

## निर्दिष्टाभ्यासः (Assignments)

1. अतिशयोक्तेः सप्रभेदान् प्रतिपादयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अष्टधा
2. रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः ।
3. भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम् ।
4. सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ।
5. अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः ।
6. चपलातिशयोक्तेः ।
7. अत्यन्तातिशयोक्तिः ।
8. यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।

9. असंबन्धातिशयोक्तिः।

10. संबन्धातिशयोक्तिः।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 2
# उल्लेखः अर्थान्तरन्यासश्च

## उद्देश्यानि (Learning Outcomes)

- उल्लेखार्थन्तरन्यासयोः विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति जगन्नाथः। कवयः साहित्यस्य निर्माणाय प्रयतन्ते। परन्तु अज्ञातपूर्वतया एव साहित्ये अलङ्काराणाम् आत्मप्रकाशो भवति। यथा विश्वस्य प्रातीनतमे ऋक्संहितायाम् ऋषयः अज्ञातपूर्वतया एव अलङ्काराणां प्रयोगं कृतवन्तः। शब्दवैचित्र्येण अर्थवैचित्र्येण च अलंकारः द्विविधः। अर्थालङ्कारे अर्थस्य प्राधान्यं दृश्यते। यतो हि अर्थवशात् एव काव्ये लोकोत्तरचमत्कारः उत्पद्यते। तेन काव्यम् इदम् अत्यन्तं रमणीयं भवति। तत्रापि बहुविधः अर्थालङ्कारः विद्यते। अप्पय्यदीक्षितस्य कुवलयानन्दात् अर्थालङ्कारेषु उल्लेखस्य अर्थान्तरन्यासस्य च वैशिष्ट्यं तत्भेदान् च पठामः।

## मुख्यपदानि (Keywords)

बहुभिः, बहुधोल्लेखात्, एकेन, विषयभेदतः, सामान्यविशेषयोः, अर्थान्तरन्यासः।

## Discussion

### 4.2.1 उल्लेखः

उल्लेखः द्विविधः – प्रथमोल्लेखः, द्वितीयोल्लेखः।

### 4.2.1 .1 प्रथमोल्लेखः

**बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।**
**स्त्रीभिः कामाऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः॥**

यत्र नानाधर्मयोगिनः एकस्य अनेकैः अनेकधा उल्लेखनरूपः, एकस्य एकैनैव अनेकधा उल्लेखनरूपश्चेति। एकस्य अनेकधर्मविशिष्टस्य बहुभिः अनेकैः गृहीतृभिः बहुधा अनेकप्रकारेण उल्लेखात् विषयीकरणात् प्रथमोल्लेखः अलङ्कारः।

'स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः' इत्युदाहरणे स्त्रीभिः कामदेवः इति, याचकैः कल्पवृक्षः इति शत्रुभिः कालः इति च तं दृष्टवान्। अत्र एकं श्रीकृष्णम् अधिकृत्य स्त्रियः याचकाः शत्रवः च यथाक्रमं कामदेवः कल्पवृक्षः कालः इति च दृष्टत्वात् प्रथमोल्लेख नाम अलङ्कारः।

**अपरमुदाहरणम् -**

**गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः।**
**यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम्॥**

तत्र द्वारकां प्रविशन् कृष्णः वृद्धादिभिः बहुभिः गजत्रातृत्वादि रुपेण युवतिभिः श्रीकान्ता इति, बालैः बालसदृशः इति बहुधोल्लिख्यते। अतः प्रथमोल्लेखः।

### 4.2.1.2 द्वितीयोल्लेखः

**एकेन बहुधोल्लेखोप्यसौ विषयभेदतः।**
**गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने॥**

अनेकप्रकारेण उल्लेखे विषयीकरणेऽपि असौ उल्लेखालङ्कारः। एकेनेव एकमेव अधिकृत्य विषयभेदतः विविधप्रकारेण उल्लिख्यते तर्हि द्वितीयोल्लेखः नाम अलङ्कारः।

'गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने' इत्युदाहरणे अयं पुरोवर्ती राजा वाग्विषये बृहस्पतिः इति कीर्तौ अर्जुनः इति आयुधविद्यायां भीष्माचार्यः इति च भवति। अत्र एकेनेव एकमेव अधिकृत्य विषयभेदतः बृहस्पतिरिति अर्जुनः इति भीष्माचार्यः इति च बहुधा उल्लेखात् द्वितीयोल्लेखालङ्कारः।

**अपरमुदाहरणम्**

**अकृशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितम्बे।**
**अधरेऽरुणमाविरस्तु चित्ते करुणाशालिकपालिभागधेयम्॥**

पार्वत्याः कुचौ अकृशौ, लग्नं कृशं, चक्षुः विपुलं, नितम्बं विसृततं अधरम् अरुणिमा इति दृश्यते। अत्र एकेनैव कुचविषये, लग्नविषये, चक्षुर्विषये, नितम्बविषये अधरविषये च अकृशौ, कृशं, विपुलं विसृततं अरुणितम् इत्यनेकविधकथनात् द्वितीयो उल्लेखः।

### 4.2.2 अर्थान्तरन्यासः।

**उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।**

सामान्यविशेषयोः उक्तिः अर्थान्तरन्यासः।

सामान्येन विशेषसमर्थनं, विशेषेण सामान्यसमर्थनं चेति अर्थान्तरन्यासो द्विविधः।

#### 4.2.2.1 सामान्येन विशेषसमर्थनरूपस्य उदाहरणं -

**हनूमानब्धिमतरत् दुष्करं किं महात्मनाम्।**

हनूमान् अब्धिं बहुयोजनविस्तृतं समुद्रम् अतरत्, तरणं चकार इति विशेषः। महात्मनां - महतां जनानां किं दुष्करं - किमसाध्यम्? महतां किमपि कार्यं न दुष्करं इति सामान्यम्। तेन सामान्येन विशेषसमर्थनात् अर्थान्तरन्यासालङ्कारः।

#### अस्य समान्येन विशेषसमर्थनरूपस्य अर्थान्तरन्यासस्य अपरम् उदाहरणम्

**दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।**
**क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव।।**

हिमालयः स्वस्य गुहासु लीनमन्धकारं सूर्यात् रक्षति। आत्मानं शरणं प्राप्ते सज्जने दुर्जने अपि उन्नतानां ममत्वमस्ति। अत्र शरणागते सज्जने इव दुर्जनेऽपि उन्नताः ममताभावं प्रकटयन्ति इति सामान्येन, हिमालयः स्वस्य गुहासु अभयं प्राप्तमन्धकारं सूर्याद्रक्षति इति विशेषं समर्थयतीति अर्थान्तरन्यासालङ्कारस्य लक्षणसमन्वयः।

#### 4.2.2.2 विशेषेण सामान्यसमर्थनरूपस्य उदाहरणम्।

**गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।**

निस्सारोपि गुणवतः वस्तुनः संसर्गात् गौरवं (प्राधान्यं) प्राप्नोति। पुष्पमालायाः सम्पर्केण तदन्तर्गतः तन्तुः अपि शिरसि धार्यते इत्यर्थः। अत्र पुष्पमालायाः सम्पर्केण तन्तुः शिरसि धार्यते इति विशेषेण निस्सारोऽपि गुणवतां संसर्गेण श्रेष्ठतां प्राप्नोति इति सामान्यसमर्थनात् अर्थान्तरन्यासालङ्कारः।

### अस्यापरमुदाहरणम्

**निजदोषावृतमनसामतिसुन्दरमिवाभाति विपरीतम्।**
**पश्यति पित्तोपहतः शशिशुभ्रं शंखमपि पीतम्।।**

स्वस्य दोषैः आवृतचित्ताः (दोषनिर्भरचित्ताः) अतिसुन्दरमपि विपरीतरूपेण पश्यन्ति। पित्तदोषेण बाधितः चन्द्रवत् धवलवर्णमपि शंखं पीतवर्णत्वेन पश्यति। अत्र दोषनिर्भरचित्तः सुन्दरमपि विपरीतरूपेण पश्यति इति विशेषेण, पित्तदोषवान् शुभ्रवर्णयुक्तं पीतवर्णत्वेन पश्यतीति सामान्यसमर्थनात् अर्थान्तरन्यासालङ्कारः।

## पुनरावृत्तिः (Recap)

- एकमेव बहुभिः विविधप्रकारेण उल्लिख्यते तर्हि प्रथमोल्लेखः नाम अलङ्कारः।
- स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः - प्रथमोल्लेखस्योदाहरणम्
- एकेनेव एकमेव अधिकृत्य विषयभेदतः विविधप्रकारेण उल्लिख्यते तर्हि द्वितीयोल्लेखः नाम अलङ्कारः।
- गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने - द्वितीयोल्लेखस्योदाहरणम्।
- सामान्यविशेषयोः उक्तिः अर्थान्तरन्यासः।
- हनूमानब्धिमतरत् दुष्करं किं महात्मनाम् - सामान्येन विशेषसमर्थनरूपस्य उदाहरणम्।
- गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।
  पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते - विशेषेण सामान्यसमर्थनरूपस्य उदाहरणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अर्थान्तरन्यासः कति विधः?
2. प्रथमोल्लेखस्य लक्षणं लिखत।
3. गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने - कस्य अलङ्कारस्य उदाहरणमिदम् ?
4. 'सामान्यविशेषयो: उक्ति:' - कस्य अलङ्कारस्य लक्षणमिदम् अलङ्कारः ?
5. उल्लेखः कति विधः?
6. सामान्येन विशेषसमर्थनस्य अर्थान्तरन्यासस्य एकमुदाहरणं लिखत।
7. 'गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।
   पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते' - कस्य अलङ्कारस्य उदाहरणमिदम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. प्रथम - द्वितीयोल्लेखयोः को भेदः?
2. उल्लेखः कतिविधः ? ते के ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. हनूमानब्धिमतरत् दुष्करं किं महात्मनाम् - अत्र कः अलङ्कारः लक्षणसमन्वयः कुरुत ?
2. स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः - अत्र कः अलङ्कारः लक्षणसमन्वयः कुरुत ?
3. अर्थान्तरन्यासं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. उल्लेखालङ्कारः सप्रभेदान् विशदयत।
2. अर्थन्तरन्यासालङ्कारम् उदाहरणसहितं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. द्विविधः।
2. बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।
3. द्वितीयोल्लेश्वस्य।
4. अर्थन्तरन्यासः।
5. द्विविधः।
6. हनूमानब्धिमतरत् दुष्करं किं महात्मनाम्।
7. विशेषेण सामान्यसमर्थनरूपस्य अर्थान्तरन्यासस्य उदाहरणम्।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 3
# दृष्टान्तः समासोक्तिः स्वभावोक्तिश्च

## उद्देश्यानि (Learning Outcomes)

- दृष्टान्तः समासोक्तिः स्वाभावोक्तिः इत्येतेषाम् अलङ्काराणां विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति न्यायात् सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः सन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः। अस्मिन् पाठभागे प्रसिद्धान् दृष्टान्त-समासोक्ति-स्वभावोक्तिः इत्येतान् अलङ्कारान् पठामः।

## मुख्यपदानि (Keywords)

चेद्बिम्बप्रतिबिम्बत्वं, परिस्फूर्तिः, प्रस्तुतेऽप्रस्तुतस्य, स्वभावस्य, जात्यादिस्थस्य।

## Discussion

### 4.3.1 दृष्टान्तालङ्कारः

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः।**

**त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्।।**

यत्र उपमानोपमेयवाक्ययोः भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तः। साक्षात् यत् वस्तु तत् बिम्बम्। कस्मिञ्चित् वस्तुनि पतितः प्रतिच्छविः तत् प्रतिबिम्बम्।

'त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्' इत्युदाहरणे हे राजन्! त्वं कीर्तिमान् चन्द्रः कान्तिमान् च। अत्र उपमानोपमेययोः चन्द्रराजयोः कान्तिमत्वकीर्तिमत्वरूपौ धर्मौ बिम्बप्रतिबिम्बभवेन वर्तते इत्यतः दृष्टान्तालङ्कारः।

**अपरमुदाहरणम् -**

**कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।**
**नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥**

अत्र भूमिः अनेन राज्ञा शोभनराजवती, रात्रिः चन्द्रेण ज्योतिष्मती प्रशस्तज्योतिः युक्ता इति वाक्यद्वये राजन्वती-ज्योतिष्मतीति भिन्नयोः सदृशयोधर्मयोः पृथङ् निर्देशात् बिम्बप्रतिबिम्बभावेन दृष्टान्तालङ्कारः।

### 4.3.2 समासोक्तिः

**समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य च।**
**अयमैन्द्रीमुखं पश्य रक्तश्चुबति चन्द्रमाः॥**

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यबलाद् अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्त्यलङ्कारः। 'अयमैन्द्रीमुखं पश्य रक्तश्चुबति चन्द्रमाः इत्युदाहरणे' अयं प्राचीदिङ्मुखं पश्य रक्तवर्णः चन्द्रः तत्र चुम्बति। अत्र प्रस्तुतवृत्तान्तं चन्द्रोदयं एव अस्मात् प्रस्तुतवृत्तान्तात् अप्रस्तुतस्य नायिकानायकवृत्तान्तस्य प्रतीतिः वर्तते इत्यतः समासोक्तिः नाम अलङ्कारः।

**अपरमुदाहरणम् -**

**व्यावल्गकुचभारमाकुलकचं व्यालोलहारावलि**
**प्रेङ्खत्कुण्डलशोभिगण्डयुगलं प्रस्वेदिवक्राम्बुजम्।**
**शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया**
**यस्मात्तन्दुक सादरं सूभगया संसेव्यते तत्कृती ॥**

अत्र कन्दुकक्रीडावृत्तान्तमेव प्रतिपाद्यविषयः। हे कन्दुक! सुन्दर्या तया त्वम संसेव्यते। क्रीडया स्तनौ चञ्चलौ, केशपाशमाकुलं जातम्। हाराः चलिताः। चलद्भयां कुण्डलाभ्यां कपोलौ मनोहरौ। स्वेदकणिकाः मुखे सन्ति। करप्रहारात् अधिकश्वासं कृतम्। एवं सुभगा सा त्वां सेवते। अत्र रतिक्रीडायाः प्रतीतिजनकात् समासोक्तेः उदाहरणमिदम्।

### 4.3.3 स्वभावोक्तिः

स्वभावेन उक्तिः स्वभावोक्तिः।

**स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।**
**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते॥**

जात्यादिस्थस्य जातिक्रियागुणसम्बन्धिनः स्वभावस्य वर्णनं स्वभावोक्तिरलङ्कारः। 'कुरङ्गैरुत्तरङ्गाक्षैः स्तब्ध कर्णैरुदीक्ष्यते' इत्युदाहरणम्। उत्तरङ्गाक्षैः, चञ्चललोचनैः, स्तब्धकर्णैः, निश्चलकर्णैः कुरङ्गैः हरिणैः उदीक्ष्यते वीक्ष्यते। अत्र कुरङ्गस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः।

**अपरमुदाहरणम् -**

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः।**
**प्रतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः॥**

मेघगमनं वर्णयति। आकाशे मेघं दृष्ट्वा तवाधीने भवति कृषिफलमिति विचार्य अकृत्रिमैः प्रेमार्द्रैर्लोचनैः ग्रामवासिनः स्त्रियः अवलोकयन्ति। अत्र ग्रामवासिनां यथार्थस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः।

## पुनरावृत्तिः (Recap)

- यत्र उपमानोपमेयवाक्ययोः भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तालङ्कारः।
- यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यबलाद् अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्तिः।
- स्वभावेन उक्तिः स्वभावोक्तिः।

- जात्यादिस्थस्य जातिक्रियागुणसम्बन्धिनः स्वभावस्य वर्णनं स्वभावोक्तिरलङ्कारः।
- त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान् - दृष्टान्तालङ्कारस्य उदाहरणम्।
- अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः - समासोक्तेः उदाहरणं भवति।
- कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते - स्वभावोक्तेः उदाहरणं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. दृष्टान्तालङ्कारस्य लक्षणं लिखत।
2. .......... उक्तिः स्वभावोक्तिः। (रिक्तं पूरयत)
3. अयमैन्द्रीमुखं पश्य रक्तश्चुबति चन्द्रमाः - कस्य अलङ्कारस्य उदाहरणं भवति।
4. समासेक्तेः लक्षणं किम्?
5. बिम्बप्रतिबिम्बत्वं चेद् ..........। (रिक्तं पूरयत)
6. 'जात्यादिस्थस्य जातिक्रियागुणसम्बन्धिनः स्वभावस्य वर्णनं' - अत्र अलङ्कारः कः?
7. 'कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते' - कस्य अलङ्कारस्य उदाहरणमिदम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. किं नाम बिम्बप्रतिबिम्बभावः?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. 'त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्' - अत्र अलङ्कारः कः लक्षणसमन्वयं कुरुत।

2. समासोक्तिः नाम अलङ्कारं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. अधोदत्तान् अलङ्कारान् विशदयत -

   क) दृष्टान्तः, ख) स्वभावोक्तिः, ग) समासोक्तिः।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः।
2. स्वभावेन।
3. समासोक्तेः।
4. समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य च।
5. दृष्टान्तः।
6. स्भावोक्तिः।
7. स्वाभावोक्तेः।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

BLOCK-5

# अलङ्काराः 3

# Unit - 1
# अपह्नुतिः (सप्रभेदः)

## उद्देश्यानि (Learning Outcomes)

- अपह्नुतेः विशेषतां सप्रभेदान् च अवगच्छति ।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति ।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम् ।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्यशास्त्रं अलङ्कारशास्त्रमित्युच्यते । 'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते' इत्याचार्य दण्डिनो वचनानुसारेण न केवलं शब्दार्थमलङ्काराः अपि तु काव्यशोभाकारिणो गुणरीत्यादयोऽपि अलङ्कारा एव । अस्मिन् पाठ्यांशे तु अलङ्कारशब्देन यमकानुप्रासादयः शब्दालङ्काराः उपमोत्प्रेक्षादयोऽर्थालङ्काराश्चैव विवक्ष्यन्ते ।

वेदोपकारकत्वात् अलङ्कारशास्त्रस्य सप्तमं वेदाङ्गत्वं वर्तते । साहित्यविद्या पञ्चमी विद्या इत्युच्यते । अलङ्कारशास्त्रे अष्टौ पद्धतयः सन्ति । ताः रस-अलङ्कार-गुण-रीति-ध्वनि-अनुमान-वक्रोक्ति-औचित्यपदैः व्यपदिश्यन्ते । तासु पद्धतिसु भामहादयः अलङ्कारेभ्यः प्राधान्यं कल्पयन्ति । अलङ्कारस्य प्राधान्यम् उद्भटः, रुद्रटः, राजशेखरः, रुय्यकः, जयदेवः, विद्यानाथः, विश्वनाथः, अप्पय्यदीक्षितः इत्यादयोऽलङ्कारनिपुणा अङ्गीकुर्वन्ति । कालिदासप्रभृतयः कवयः अपि स्वस्वकाव्येषु अलङ्काराणां सान्निध्येन भाषां काव्यमण्डलं च समलङ्कृतवन्तः ।

अप्पय्यदीक्षितः षोडशे शतके स्वजीवितेन साहित्यनभोमण्डलं प्रशोभयामास। काव्यशास्त्रे तस्य योगदानं समुन्नतमेव। तेन महात्मना चतुरधिकशतमिताः ग्रन्थाः रचिताः। तेषु चित्रमीमांसा, कुवलयानन्दः, वृत्तिवार्तिकञ्च काव्यशास्त्रसम्बद्धाः।

कुवलयानन्दः अर्थालङ्कारसम्बद्धो ग्रन्थः। तस्मिन् १२३ अलङ्काराः निरूपिताः। तेषु ९६ अलङ्काराः जयदेवस्य चन्द्रालोकात् गृहीताः। शेषाः १७ अप्पय्यदीक्षितेन स्वयमेवोद्भाविताः अन्येभ्यो गृहीताः वा। दीक्षितमहाशयेन निरूपितेषु अलङ्कारेषु अपह्नुतिः नाम अलङ्कारस्य अध्ययनम् अस्मिन् एकके करिष्यामः।

## मुख्यपदानि (Keywords)

अन्यस्यारोपार्थो धर्मनिह्नवः, युक्तिपूर्वश्चेदुच्यते, पर्यस्ता, अन्यस्य शङ्कायां, भ्रान्तिवारणे, शङ्कातस्तथ्यनिह्नवे, व्याजाद्यैर्निह्नुतेः

## Discussion

### अपह्नुतिः

अपह्नुतिः निषेधः, स च सादृश्यमूलकाभेद प्रतिपत्तिपूर्वकः अलङ्कारः।

अपह्नुतिः षड्विधा - शुद्धापह्नुतिः, हेत्वापह्नुतिः, पर्यस्तापह्नुतिः, भ्रान्तापह्नुतिः, छेकापह्नुतिः, कैतवापह्नुतिः च इति।

### 4.1.1 शुद्धापह्नुतिः

**शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः।**
**नायं सुधांशुः, किं तर्हि व्योमगङ्गासरोरुहम्॥**

अन्यवस्तुनः धर्मं आरोपयितुं यथार्थवस्तुनः धर्मनिह्नुतिः यत्र क्रियते तत्र शुद्धापह्नुतिः।

'नायं सुधांशुः, किं तर्हि व्योमगङ्गासरोरुहम्' इत्युदाहरणे अयं आकाशे दृश्यमानः चन्द्रः न, किन्तु अकाशगङ्गा पद्ममेव। अत्र आकाशगङ्गपद्मत्वम् आरोपायितुं यथार्थवस्तुनः चन्द्रस्य चन्द्रत्वं नाम धर्मं निह्नूयते। तस्मात् शुद्धापह्नुतिः नाम अलङ्कारः।

**रूपकापह्नुत्योः को भेदः?**

रूपके आरोपः अस्ति । किन्तु रूपके प्रकृतधर्मनिषेधो नास्तीति भेदः। अपह्नुतौ असत्यमारोपयितुम् अन्यवस्तुनः निह्नुतिः।

**अपरमुदाहरणम् -**

**अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे**
**सारङ्गं कतिचिच्च संजगदिरे, भूच्छायमैच्छन् परे।**
**इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते**
**तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥**

अत्र इन्दौ दृश्यमाने श्यामवस्तुनि अन्धकारत्वारोपार्थं न केवलं स्वाभाविकस्य, किन्तु परैः उत्प्रेक्षितानामपि धर्मणां अपह्नवः कृतः इति विशेषः । एकत्र अनेकापह्नवरूपमपि वैचित्र्यमस्ति । अङ्कत्वपङ्कत्वादीनां परमतत्वेन उपन्यासात् निषेधः। अतः शुद्धापह्नुतेः उदाहरणमस्ति।

### 4.1.2 हेत्वपह्नुतिः

**स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः।**
**नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः॥**

अप्रकृतवस्तुधर्मस्य आरोपार्थं प्रकृतवस्तुधर्मनिषेधः, युक्तिपूर्वश्चेद् सहेतुको यदि क्रियते तर्हि हेत्वपह्नुतिः। 'नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः' इत्युदाहरणे अयं आकाशे दृश्यमानः वस्तु तीव्रत्वात् न सूर्यः निशि दृश्यमानत्वात् न चन्द्रः। किन्तु समुद्रात् उत्थितः बडवाग्निः भवति। अत्र प्रकृतवस्तुधर्मस्य चन्द्रत्वस्य सूर्यत्वस्य च निषेधे तीव्रत्वं निशि दृश्यमानत्वं च क्रमेण हेतू निर्दिष्टौ। निषेधः तु अप्रकृतवस्तुधर्मस्य और्वत्वारोपाय इत्यतः हेत्वपह्नुतिः।

**अपरमुदाहरणम्**

**मन्थानभूमिधरमूलशिलासहस्र -**
**सङ्घट्टनव्रणकिणः स्फुरतीन्दुमध्ये।**
**छाया मृगः शशक इत्यतिपामरोक्तिः**
**तेषां कथञ्चिदपि तत्र हि न प्रसक्तिः॥**

अत्र चन्द्रे समुद्रमथनकाले मन्दरपर्वतस्य शिलासंघट्टनेन कृतव्रणकिणस्य एव प्रसक्तिः, न पुनः छायादीनां इति तेषाम् अपह्नवः पामरवचनोपन्यासेन आविष्कृतः। छाया शब्देन अत्र भूच्छाया विवक्ष्यते।

अतः हेत्वपह्नुतेः उदाहरणमेव।

### 4.1.3 पर्यस्तापह्नुतिः

**अन्यत्र तस्यारोपार्थः पर्यास्तापह्नुतिस्तु सः।**
**नायं सुधांशुः, किं तर्हि? सुधांशुः प्रेयसीमुखम्॥**

पर्यस्ता नाम आरोपव्यधिकरणा अपह्नुतिः निषेधः इति। अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्य आरोपार्थः यथार्थवस्तुनः धर्मनिह्नुतिः यत्र क्रियते तत्र पर्यस्तापह्नुतिः नाम अलङ्कारः।

'नायं सुधांशुः, किं तर्हि? सुधांशुः प्रेयसीमुखम्' इत्युदाहरणे अयं पुरो दृश्यमानः वस्तुः न चन्द्रः किन्तु प्रेयसीमुखं सुधांशुः भवति । अत्र प्रकृते चन्द्रे सुधांशुत्व निषेधः। अन्यत्र वर्णनीये प्रेयसीमुखे तस्य सुधांशुत्वस्य आरोपार्थो इति पर्यस्ताह्नुतिः नाम अलङ्कारः।

### अपरमुदाहरणं

**हालाहलो नैव विषं, विषं रमा**
**जनाः परं व्यत्ययमत्र मन्वते।**
**निपीय जागर्ति सुखेन तं शिवः**
**स्पृशन्निमां मुह्यति निद्रया हरिः॥**

अत्र हालाहले विषत्वनिषेधः रमायां तस्य आरोपार्थः। उत्तरार्धे हेतुः अपि उक्त इति पूर्वोदाहरणात् विशेषः। तथा च पर्यस्तापह्नुतेः अपि हेतोः अनुक्तया उक्तया च द्वैविध्यं बोध्यम्।

### 4.1.4 भ्रान्तापह्नुतिः

**भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे।**
**तापं करोति सोत्कम्पं, ज्वरः किं ? न, सखि ! स्मरः॥**

अन्यस्य प्रकृतेः अस्य अतत्वस्य शङ्कायां सत्यां, भ्रमे सति इत्यर्थः, भ्रान्तेः भ्रमस्य दूरीकरणे तत्त्वाख्यानेन निर्वतने भ्रमविषयनिषेधात् भ्रान्तापह्नुतिः।

'तापं करोति  सोत्कम्पं, ज्वरः किं ? न, सखि ! स्मरः' इत्युदाहरणे मदनपीडिता नायिका वदति स्मरं मनसि कृत्वा 'सोत्कम्पं तापं करोति इति । कम्पस्य तापस्य च ज्वरसाधारण्या ऋजुबुद्धिः सखी शङ्कते किं ज्वरः ? इति । नायिका 'न ज्वरः किन्तु स्मरः' इति तत्वकथनपूर्वकं भ्रमविषयं ज्वरं निषिध्य सख्याः भ्रमं वारयति । तदेवं तापं करोति - इत्यादि श्लोकार्धं भ्रान्तापह्नुतेः उदाहरणम् । सादृश्योद्गमे भ्रन्तिमदलङ्कारः । ततः तन्निषेधे भ्रान्तापह्नुतिः ।

### अपरमुदाहरणम्

**नागरिक समधिकोन्नतिरिह महिषः कोऽयमुभयतः पुच्छः ।**
**नहि नहि करिकलभोऽयं शुण्डादण्डोऽयमस्य न तु पुच्छम् ॥**

अत्र करिकलभे महिषभ्रान्तिः निश्चयरूपा । ज्वरः किं इति पूर्वोदाहरणे सन्देहरुपेति विशेषः । अपि च ग्रामीणस्य गजकलभे महिषभ्रान्तिः, शुण्डादण्डे पुच्छभ्रान्तिश्च नागरिकेण तत्त्वाख्यानपूर्वकं वार्यते इति भ्रान्तापह्नुतिः ।

### 4.1.5 छेकापह्नुतिः

**छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे ।**
**प्रजल्पन्मत्पदे लग्नः, कान्तः किं ? न हि , नूपुरः ॥**

अन्यस्य शङ्कातः विदग्धरीत्या सत्यनिह्नवे संशयदूरीकरणं यत्र क्रियते तत्र छेकापह्नुतिः नाम अलङ्कारः। छेको नाम विदग्धः, तत्कृता अपह्नुतिः छेकापह्नुतिः इति ।

'प्रजल्पन्मत्पदे लग्नः, कान्तः किं ? न हि, नूपुरः' इत्युदाहरणे प्रजल्पन् इति नायिकावचनं श्रुत्वा कान्ता किं ? इति सख्यां पृष्टे न कान्तः किन्तु नूपुरः एव इति विदग्धरीत्या सत्यनिह्नवेन सख्याः संशयदूरीकरणात् छेकापह्नुतिः नाम अलङ्कारः ।

### अपरमुदाहरणम्

**सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ।**
**नागरिकः किं मिलितो ? नहि नहि, सखि ! हैमनः पवनः ॥**

अत्र सीत्कारं शिक्षयति इत्यादिवाक्यार्थं नागरिकाभिप्रायेण प्रियसखीं प्रति कयाचिद् उक्तं आकर्ण्य अन्यया तत्त्वार्थः शङ्कितः । तां प्रति तच्छङ्कानिवृत्तये वाक्यस्य हैमन्तिकपवनपरत्ववर्णनेन तात्त्विकस्य नागरिकस्य अपह्नवः कृतः।

### 4.1.6 कैतवापह्नुतिः

**कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।**
**निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्॥**

व्याजाद्यैः पदैः निह्नुतेः निषेधस्य व्यक्तौ स्फुटीकरणे कैतवापह्नुतिः। व्याजाद्यैः इत्यस्य छलकैतवप्रभृतिभिः पदैः इत्यर्थः।

'निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्' इत्युदाहरणे कान्तकटाक्षव्याजेन कामबाणाः निर्गच्छन्ति । अत्र कैतवं इति पदेन इमे न कान्ताकटाक्षः किन्तु कामबाणाः इति कान्ताकटाक्षस्य निह्नुतिः क्रियते इत्यतः कैतवापह्नुतिः नाम अलङ्कारः।

#### अपरमुदाहरणम् -

**रिक्तेषु वारिकथया विपिनोदरेषु**
**मध्याह्नजृम्भितमहातपतापतप्ताः।**
**स्कन्धान्तरोत्थितदवाग्निशिखवाच्छलेन**
**जिह्वां प्रसार्य तरवो जलमर्थयन्ते॥**

अत्र दवाग्निशिखाव्याजेन ग्रीष्मतप्ततरवः जलं प्रार्थयन्ते इत्यनेन न इमाः दवाग्निशिखाः, किन्तु तरुणां जिह्वा इति व्याजपदात् प्रतीयते। अतः कैतवापह्नुतेः उदाहरणं भवति।

## पुनरावृत्तिः (Recap)

- अपह्नुतिः निषेधः, स च सादृश्यमूलकाभेदप्रतिपत्तिपूर्वकः अलङ्कारः।
- अपह्नुतिः षड्विधा।

- शुद्धापह्नुतिः, हेत्वपह्नुतिः, पर्यस्तापह्नुतिः, भ्रान्तापह्नुतिः, छेकापह्नुतिः, कैतवापह्नुतिः च इति।
- अन्यवस्तुनः धर्मं आरोपयितुं यथार्थवस्तुनः धर्मःनिह्नुतिः यत्र क्रियते तत्र शुद्धापह्नुतिः।
- अप्रकृतवस्तुधर्मस्य आरोपार्थं प्रकृतवस्तुधर्मनिषेधः, युक्तिपूर्वश्चेद् सहेतुको यदि क्रियते तर्हि हेत्वपह्नुतिः।
- अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्य आरोपार्थः यथार्थवस्तुनः धर्मनिह्नुतिः यत्र क्रियते तत्र पर्यस्तापह्नुतिः नाम अलङ्कारः।
- भ्रमविषयनिषेधात् भ्रान्तापह्नुतिः।
- अन्यस्य शङ्कातः विदग्धरीत्या सत्यनिह्नवे संशयदूरीकरणं यत्र क्रियते तत्र छेकापह्नुतिः।
- व्याजाद्यैः पदैः निह्नुतेः निषेधस्य व्यक्तौ स्फुटीकरणे कैतवापह्नुतिः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अपह्नुतिः इत्यस्य को ऽर्थः?
2. शुद्धापह्नुतेः लक्षणं किम्?
3. हेत्वपह्नुतेः एकमुदाहरणं लिखत।
4. पर्यस्ता इत्यस्य कोऽर्थः?
5. अन्यस्य शङ्कायां ......... भ्रान्तापह्नुतिः। (रिक्तं पूरयत)
6. अन्यस्य शङ्कातः विदग्धरीत्या सत्यनिह्नवे संशयदूरीकरणम् यत्र क्रियते तत्र को नाम अलङ्कारः?
7. व्याजं इत्यस्य कोऽर्थः?
8. कैतवापह्नुतेः लक्षणं किम्?
9. भ्रान्तापह्नुतेः उदाहरणं लिखत।
10. नायं सुधांशुः, किं तर्हि? सुधांशुः प्रेयसीमुखम् - कस्य अलङ्कारस्य उदाहरणमिदम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. अपह्नुतिः कतिविधा ? ताः काः ?
2. रूपक - अपह्नुत्योः को भेदः?

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः - अत्र कः अलङ्कारः ? लक्षणसमन्वयं कुरुत ।
2. शुद्धापह्नुतिं विशदयत ।
3. तापं करोति सोत्कम्पं, ज्वरः किं ? न, सखि ! स्मरः - अत्र कः अलङ्कारः लक्षणसमन्वयं कुरुत ।
4. कैवतावपह्नुतेः लक्षणं किम् ? उदाहरणसहितं विशदयत ।

## निर्दिष्टाभ्यासः (Assignments)

अपह्नुतिं सप्रभेदान् विवृणुत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. निषेधः ।
2. शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ।
3. नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः ।
4. आरोपव्यधिकरणा

5. भ्रान्तिवारणे।

6. छेकापह्नुतिः।

7. छलम्।

8. कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।

9. तापं करोति सोत्कम्पं, ज्वरः किं ? न, सखि ! स्मरः॥

10. पर्यस्तापह्नुतेः।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018

2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 2

# व्यतिरेकः तुल्ययोगिता च

## उद्देश्यानि (Learning Outcomes)

- व्यतिरेकस्य तुल्ययोगितायाः च विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

रमणीयार्थप्रातिपदिकः शब्दः काव्यं इति जगन्नाथः। कवयः साहित्यस्य निर्माणाय प्रयतन्ते। परन्तु अज्ञातपूर्वतया एव साहित्ये अलङ्काराणाम् आत्मप्रकाशो भवति। यथा विश्वस्य प्रातीनतमे ऋक्संहितायाम् ऋषयः अज्ञातपूर्वतया एव अलङ्काराणां प्रयोगं कृतवन्तः। शब्दवैचित्र्येण अर्थवैचित्र्येण च अलंकारः द्विविधः। अर्थालङ्कारे अर्थस्य प्राधान्यं दृश्यते। यतो हि अर्थवशात् एव काव्ये लोकोत्तरचमत्कारः उत्पद्यते। तेन काव्यम् इदम् अत्यन्तं रमणीयं भवति। तत्रापि बहुविधः अर्थालङ्कारः विद्यते। अप्पय्यदीक्षितस्य कुवलयानन्दात् अर्थालङ्कारेषु व्यतिरेकतुल्ययोगितयोः वैशिष्ट्यं तद्भेदान् च पठामः।

## मुख्यपदानि (Keywords)

विशेषश्चेदुपमानोपमेययोः, आधिक्ये, न्यूनतायां, अनुभयभावे, वर्ण्यानामितरेषां, धर्मैक्यं, हिताहिते, वृत्तितौल्यमपरा, गुणोत्कृष्टैः, समीकृत्य, वचोऽन्या।

## Discussion

### 5.2.1 व्यतिरेकः

व्यतिरेको नाम वैलक्षण्यम्। तच्च त्रिविधम्। उपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायां अनुभयभावे वा पर्यवसानात्।

### 5.2.1.1 उपमानमपेक्ष्य उपमेयस्य गुणाधिक्यरूपस्य व्यतिरेकस्योदाहरणम् -

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः।**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥**

उपमानोपमेययोः विशेषः वैलक्षण्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः। साम्यमुक्त्वा वैधर्म्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः इत्यर्थः। शैलाः इवोन्नताः .. इत्युदाहरणम्। सज्जनाः पर्वताः इवोन्नताः (शैलाः आकारे, सन्तः चित्ते औन्नत्ययुक्ताः)। किन्तु सज्जनाः प्रकृत्या स्वभावेन कोमलाः मृदुलाः। शैलास्तु कठिनाः इति भावः। अत्र औन्नत्ये साम्यमुक्त्वा प्रकृतिकोमलत्वे वैधर्म्यवर्णनात् व्यतिरेकालङ्कारः। अत्र उपमानापेक्षया उपमेयस्य उत्कर्षो वर्णित इत्यतः उपमेयाधिक्यपर्यवसायिनो व्यतिरेकस्योदाहरणमिदम्।

### अपरमुदाहरणम् -

**पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर।**
**भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते॥**

हे वीर, तव करस्यायं विशेषः। कल्पवृक्षस्य पल्लवः तव करः कर्णं भूषयति। तव करः राधेयं कर्णं दानादिना तिरस्करोति। अत्र कर्णभूषणे साम्यं, राधेयस्य कर्णस्य तिरस्करणे वैधर्म्यं चोक्तत्वात् व्यतिरेकालङ्कारः। उपमेयस्य गुणाधिक्यवर्णना च वर्तते।

### 5.2.1.2 न्यूनत्वपर्यवसायिनः व्यतिरेकस्योदाहरणम् –

**रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियायाः गुणैः।**
**त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि।**
**कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः**
**सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः॥**

विरही नायकः अशोकं वदति - त्वं नवपल्लवैः रक्तः (रक्तवर्णः)। अहं प्रियायाः श्लाघ्यैः गुणैः रक्तः (अनुरक्तः)। भ्रमराः त्वामायान्ति। कामकटाक्षरूपाः बाणाः मामप्यायान्ति। कान्तायाः पादस्पर्शनं तव प्रमोदहेतुर्भवति। तद्वत् ममापि कान्तागमनं हर्षजनकं भवति। एवं आवयोः सर्वमपि तुल्यमेव। किन्तु त्वम् विधात्रा अशोकः (शोकरहितः) कृतः, अहं तु सशोकः (शोकसहितः) कृतःइत्यर्थः। अत्र रक्तत्वं,

शिलीमुखलक्ष्यत्वं, कान्तापादस्पृहयालुत्वं इत्येतेषु वर्ण्यावर्ण्ययोः साम्यमुक्त्वा अशोकत्व-सशोकत्वविषये वैधर्म्यमुक्तमित्यतोऽत्र व्यतिरेकालङ्कारः। उपमेये सशोकत्वरूपं न्यूनत्वं वर्णितमिति न्यूनत्वपर्यावसायित्वम्।

### 5.2.1.3 अनुभयत्वपर्यवसायिनो व्यतिरेकस्योदाहरणम्।

**दृढतरनिबुद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य।**

**कृपणस्य कृपाणस्य च केवलमाकारतो भेदः।।**

कृपणस्य (लुब्धस्य) कृपणसादृश्यम् वर्णयति। उभावपि दृढतरनिबद्धमुष्टी, कोशनिषण्णौ, सहजमलिनौ च भवतः। कृपणस्य मुष्टिः (करग्रहणस्थानं) अतिदृढतया समायोजितम्, कृपणः स्वहस्तप्राप्तं धनं अन्येभ्योऽदत्वैव मुष्टिं दृढतया गृह्णाति। खड्गः कोशे तदावरणे तिष्ठति, लुब्धः सदापि स्वस्य भण्डागारे धनराशिं पश्यन् गणयंश्च तिष्ठति। कृपणस्य मलिनवर्णत्वं (कृष्णवर्णता) सहजम्, कृपणस्य दाक्षिण्यराहित्यरूपं मलिनत्वम्। अनयोर्मिथो भेदः केवलं आकारगत एवेत्यर्थः। अत्र दृढतरनिबद्धमुष्टित्वे कोशनिषण्णत्वे सहजमलिनत्वे च साम्यं संसूच्य आकारे वैधर्म्यमुक्तत्वात् व्यतिरेकालङ्कारः। उपमेयस्य गुणस्य आधिक्यन्यूनत्वयोरभाववर्णनादनुभयपर्यवसायी व्यतिरेकः।

## 5.2.2 तुल्ययोगिता

तुल्यानां सादृश्यवतां योगिता एकधर्मान्वयित्वं तुल्ययोगिता। तच्च चतुर्विधा - (1) प्रस्तुतैकधर्मान्वयरूपा (2) अप्रस्तुतैकधर्मान्वयरूपा (3) हिताहितवृत्तितौल्यरूपा (4) उत्कृष्टसमीकरणोक्तिरूपा चेति।

### 5.2.2.1 प्रथमद्वितीये तुल्ययोगिते -

**वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता।**

**संकुचन्ति सरोजानि स्वैरिणीवदनानि च॥**

वर्ण्यानां प्रस्तुतानामेव, अथवा इतरेषां अप्रस्तुतानामेव धर्मैक्यं गुणक्रियारूपैकधर्मान्वयः तुल्ययोगितालङ्कारः। यत्र द्वयोः प्रस्तुतयोः बहूनां प्रस्तुतानामेव वा एकधर्मान्वयः वर्ण्यते तत्र प्रथमा तुल्ययोगिता।

यत्र द्वयोः बहूनां वा अप्रस्तुतानामेव एकधर्मान्वयः तत्र द्वितीया तुल्ययोगिता इति। अनेकप्रस्तुतमात्र-संबद्धैकधर्मत्वं प्रथमायाः, अनेकाप्रस्तुतमात्रसंबद्धैकधर्मत्वं द्वितीयायाश्च तुल्ययोगितायाः लक्षणम्।

'संकुचन्ति सरोजानि स्वैरिणीवदनानि च' इत्युदाहरणे सरोजानि पद्मानि स्वैरिणीनां अभिसारिकाणां वदनानि मुखाति च सङ्कुचन्ति सङ्कोचं प्राप्नुवन्ति इति प्रस्तुततुल्ययोगितायाः उदाहरणम्।

### अप्रस्तुततुल्ययोगितायाः उदाहरणम् -

**त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।**
**मालतीशशभृल्लेखाकदलीनां कठोरता॥**

हे प्रिये, तव अङ्गमार्दवे दृष्टे सति कस्य मनसि मालतीकुसुमस्यचन्द्रलेखायाः कदल्याः च कठोरता न भासते? अत्र नायिकासुकुमार्ये वर्ण्ये, अस्तुतानां मालतीशशभृल्लेखाकदलीनां कठोरतारूपे एकगुणान्वात् अप्रस्तुततुल्ययोगिता।

### 5.2.2.2 तृतीया तुल्ययोगिता

**हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।**
**प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया॥**

हिताहिते मित्रामित्रविषये वृत्तेः व्यापारस्य तौल्यं साम्ये एकविधव्यवहरणं अपरा अन्या तृतीया तुल्ययोगिता। हे राजन्! त्वया मित्रशात्रवयोः विषये (मित्रेभ्यः शत्रुभ्यश्च) पराभूतिः परा उत्कृष्टा भूतिरैश्वर्यं, पराभवश्च प्रदीयते इत्युदाहरणम्। अत्र हिते मित्रे, अहिते शत्रौ च पराभूतिदानरूपसमानव्यापारवर्णनात् तुल्ययोगिता।

### अपरमुदाहरणम् -

**यश्च निम्बं परशुना,यश्चैनं मधुसर्पिषा।**
**यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः॥**

यः निम्बवृक्षं परशुना वृश्चति, मधुसर्पिषा सिञ्चति, गन्धमाल्यद्यैः अर्चति। हिते अहिते च निम्बः कटुरेवेति समानव्यापारवर्णनात् तृतिया तुल्ययोगिता।

### 5.2.2.3 चतुर्थी तुल्ययोगिता

**गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता।**
**लोकपालो यमः पाशी श्रीदः शक्रो भवानपि॥**

गुणोत्कृष्टैः शौर्यादिगुणैः श्रेष्ठैः समीकृत्य समानं कृत्वा वचः वचनं वर्णनं अन्या चतुर्थी तुल्ययोगिता।

यमः, पाशी-वरुण, श्रीदः-कुबेरः, शक्रः इन्द्रः, भवानपि लोकपालः इत्यत्र वर्णनीयो राजा उत्कृष्टगुणैर्यमादिभिः लोकपालकत्वरूपधर्मतः समीकृत्य वर्णितः इति लक्षणसमन्वयः।

**अपरमुदाहरणम् -**

**सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च।**
**अणद्वयं न तिष्ठन्ति घनारब्धानि स्वयम्॥**

सुन्दरीणां समागमानि स्वयं घनारब्धानि विद्युद्विलसितानि च क्षणद्वयं न तिष्ठती। अत्र क्षणद्वयं न तिष्ठतीति कार्ये तुल्यता वर्तमानत्वात् चतुर्थी तुल्ययोगिता।

## पुनरावृत्तिः (Recap)

- व्यतिरेको नाम वैलक्षण्यम्।
- व्यतिरेको त्रिविधः।
- उपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायां अनुभयभावे इति त्रिधा।
- उपमानोपमेययोः विशेषः वैलक्ष्यण्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः।
- तुल्यानां सादृश्यवतां योगिता एकधर्मान्वयित्वं तुल्ययोगिता।
- तुल्ययोगिता चतुर्विधा।
- प्रस्तुतैकधर्मान्वयरूपा, अप्रस्तुतैकधर्मान्वयरूपा, हिताहितवृत्तितौल्यरूपा, उत्कृष्टसमीकरणोक्ति-रूपा चेति।
- द्वयोः प्रस्तुतयोः बहूनां प्रस्तुतानामेव वा एकधर्मान्वयः वर्ण्यते तत्र प्रथमा तुल्ययोगिता।
- यत्र द्वयोः बहूनां वा अप्रस्तुतानामेव एकधर्मान्वयः तत्र द्वितीया तुल्ययोगिता इति।
- हिताहिते मित्रामित्रविषये वृत्तेः व्यापारस्य तौल्ये साम्ये एकविधव्यवहरणं अपरा अन्या तृतीया तुल्ययोगिता।

- गुणोत्कृष्टैः शौर्यादिगुणैः श्रेष्ठैः समीकृत्य समानं कृत्वा वचः वचनं वर्णनं अन्या चतुर्थी तुल्ययोगिता।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. किं नाम व्यतिरेकः ?
2. व्यतिरेकस्य लक्षणं लिखत।
3. तुल्ययोगितायाः लक्षणं किम् ?
4. प्रथम तुल्ययोगितायाः लक्षणं किम् ?
5. यत्र द्वयोः बहूनां वा अप्रस्तुतानामेव एकधर्मान्वयः यत्र क्रियते। तत्र अलङ्कारः कः?
6. 'प्रदीयते परभूतिर्मित्रशात्रवयोस्त्वया' - अत्र अलङ्कारः कः ?
7. 'लोकपालो यमः पाशी श्रीदः शक्रो भवानपि' - अत्र अलङ्कारः कः ?
8. 'शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः' - अत्र अलङ्कारः कः ?
9. गुणोत्कृष्टैः समीकृत्य वचोऽन्या .......... । (रिक्तस्थानं पूरयत)
10. हिताहिते वृत्तेः तौल्यं एकविधव्यवहरणं अपरा भवति। कस्य अलङ्कारस्य लक्षणमिदम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. व्यतिरेकः कतिविधः? ते के ?
2. तुल्ययोगिता कतिविधा ? ताः काः ?
3. न्यूनत्वपर्यवसायिनः व्यतिरेकस्य उदाहरणं लिखत।
4. अनुभयत्वपर्यवसायिनः व्यतिरेकस्य उदाहरणं लिखत।

## एकैकया खण्डिकया उत्तरं लिखत ।
(Answer the following questions in a paragraph)

1. चतुर्थीतुल्ययोगितां विशदयत ।
2. 'संकुचन्ति सरोजानि स्वैरिणी वदनानि च' - अत्र अलङ्कारः कः? लक्षणसमन्वयं कुरुत ।
3. 'दृढतरनिबुद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।
   कृपणस्य कृपाणस्य च केवलमाकारतो भेदः' - अत्र अलङ्कारः कः? लक्षणसमन्वयं कुरुत ।

## निर्दिष्टाभ्यासः (Assignments)

1. व्यतिरेकं सप्रभेदान् विशदयत ।
2. तुल्ययोगितालङ्कारं विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. व्यतिरेको नाम वैलक्षण्यम् ।
2. व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
3. तुल्यानां सादृश्यवतां योगिता एकधर्मान्वयित्वं तुल्ययोगिता ।
4. यत्र द्वयोः प्रस्तुतयोः बहूनां प्रस्तुतानामेव वा एकधर्मान्वयः वर्ण्यते तत्र प्रथमा तुल्ययोगिता ।
5. द्वितीया तुल्ययोगिता ।
6. तृतीया तुल्ययोगिता ।
7. चतुर्थी तुल्ययोगिता ।
8. व्यतिरेकः ।
9. तुल्ययोगिता ।

10. तृतीया तुल्ययोगिता।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

# Unit - 3

# अप्रस्तुतप्रशंसा श्लेषश्च

## उद्देश्यानि (Learning Outcomes)

- अप्रस्तुतप्रशंसायाः श्लेषस्य च विशेषतां भेदान् च अवगच्छति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति न्यायात् सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः सन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः। अस्मिन् पाठभागे अप्रस्तुतप्रशंसां श्लेषं तयोः भेदान् च पठामः।

## मुख्यपदानि (Keywords)

नानार्थसंश्रयः, श्लेषः, वर्ण्यावर्ण्योभयाश्रितः, सभङ्ग-अभङ्गश्लेषः, अप्रस्तुतप्रशंसा, प्रस्तुताश्रया।

## Discussion

### 5.3.1 श्लेषः

**नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रितः।**

अनेकार्थगोचरः शब्दविन्यासः श्लेषः। श्लेषः त्रिविधः।

1. वर्ण्याश्रयः (प्रकृतानेकार्थविषयः)
2. अवर्ण्याश्रयः (अप्रकृतानेकार्थविषयः)।
3. उभयाश्रयः (प्रकृताप्रकृतानेकार्थविषयः, प्रकृताप्रकृतश्लेषः)।।

### 5.3.1. 1 प्रकृतश्लेषः (वर्ण्याश्रयश्लेषः)।

प्रकृतानेकार्थविषयशब्दविन्यासरूपः प्रकृतश्लेषः।

यथा - **सर्वदोमाधवः पायात् स योऽगंगामदीधरत्।**

सर्वदः माधवः यः अगं गाम् अदीधरत् सः पायात् इति। अत्र सर्वाभीष्टप्रदाता कृष्णः रक्षतु यः अगं (पर्वतं - गोवर्धनपर्वतं) गां (पृथिवीं) च धृतवान् इत्येकः अर्थः कृष्णार्थे। अयं प्रकृतार्थः। सर्वदा उमाधवः पायात् (रक्षेत्) यः गङ्गामदीधरत्। उमाधवः उमायाः धवः भर्ता शिवः इति शिवपक्षे। अयमपि प्रकृतार्थः। अस्यां प्रार्थनायां नानार्थपदाश्रयेण प्रकृतयोः कृष्णशिवयोरुभयोः स्तुतेः वर्तमानत्वात् प्रकृतश्लेषः।

### प्रकृतश्लेषस्य अपरमुदाहरणम् –

**त्रातः काकोदरो येन द्रोग्धापि करुणात्मना।**
**पूतनामारणाख्यातः स मेऽस्तु शरणं प्रभुः।।**

काचन प्रार्थनेयम्। येन करुणात्मना, रामेण अदरः भयरहितः द्रोग्धापि द्रोहशीलोऽपि काकः रक्षितः, पवित्रनामधेयः युद्धे विख्यातः सः (रामः) मे शरणमस्तु इत्येकोऽर्थः। येन काकोदरः (सर्पः) कालियः रक्षितः, पूतनायाः मारणेन ख्यातः सः कृष्णः मे शरणमस्तु इत्यपरोऽर्थः। अत्र नानार्थपदाश्रयेण प्रकृतयोः उभयोः रामकृष्णयोः स्तुतेर्वर्तमानत्वात् प्रकृतश्लेषः।

### 5.3.1. 2 अप्रकृतश्लेषः (अवर्ण्यश्लेषः)

अप्रकृतानेकार्थविषयशब्दविन्यासरूपः अप्रकृतश्लेषः।

**अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना।**

तव मुखं हरिणा (सूर्येण) आहितसक्तिना (कृतासक्तिना) अब्जेन (कमलेन) तुल्यम् इत्येकोऽर्थः। त्वन्मुखं हरिणेन मृगेण आहितसक्तिना कृतसङ्गेन अब्जेन (चन्द्रेण) तुल्यमिति द्वितीयोऽर्थः। अत्र प्रकृते नायिकावर्णने अप्रकृतयोः उभयोः पद्मचन्द्रयोः वर्णनात् अप्रकृतश्लेषः।

**अप्रकृतश्लेषस्यापरमुदाहरणम् -**

**नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।**
**सदृशे वनवृद्धानां कमलानां त्वदीक्षणे॥**

त्वदीक्षणे लुब्धैः मधुलोलुपैः भूरिशिलीमुखैः भ्रमरैः आकुलीभावं नीतानां, वने (जले) वृद्धिं प्राप्तानां (कमलानां) सदृशे भवतः इत्येकोऽर्थः पद्मपक्षे।

त्वदीक्षणे लुब्धैः व्याधैः शिलीमुखैः बाणैः आकुलीभावं नीतानां, वने अरण्ये वृद्धानां हरिणानां सदृशे भवतः इति हरिणपक्षे।

अत्र नायिकानेत्रयोः उपमानयोः कमलहरिणयोः नानार्थपदाश्रयेण सादृश्यवर्णनात् अप्रकृतश्लेषः।

### 5.3.1. 3 प्रकृताप्रकृतश्लेषः (वर्ण्यावर्ण्यश्लेषः)

प्रकृताप्रकृतानेकार्थगोचरः शब्दविन्यासः प्रकृताप्रकृतश्लेषः।

**उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः।**

उच्चरद् उद्गच्छद् भूरिकीलालः बहुरक्तप्रवहमानः वाहिनीपतिः सेनापतिः शुशुभे इति प्रकृतार्थः। उच्चरद् बहु कीलालं जलं यस्य सः नदीनां पतिः समुद्रः शुशुभे इति अप्रकृतार्थः। अत्र श्लिष्टपदानां प्रकृताप्रकृतार्थगोचरत्वात् प्रकृताप्रकृतश्लेषः।

**प्रकृताप्रकृतश्लेषस्यापरमुदाहरणम् -**

**असावुदयमारूढः कान्तिमान् रक्तमण्डलः।**
**राजा हरति लोकस्य हृदयं मृदुलैः करैः।।**

उदयमारूढः (अभिवृद्धिं प्राप्तः) रक्तमण्डलः (अनुरक्तप्रजामण्डलयुक्तः) असौ राजा मृदुलैः करैः (अल्पैः ग्राह्यधनैः) लोकस्य हृदयं हरति (आवर्जयति) इति प्रकृतार्थः। उदयगिरिमारूढः रक्तमण्डलः

(अरुणमण्डल:) राजा (चन्द्र:) मृदुलैः करैः (शीतलत्वान्मृदुलैः करैः) लोकस्य हृदयं हरति (आकर्षयति) इति अप्रकृतार्थ: ।

अत्र प्रकृते राजवर्णनायाम् अप्रकृतस्य चन्द्रवृत्तान्तस्य वर्णनात् प्रकृताप्रकृतश्लेष: ।

### 5.3.1. 4 सभङ्ग-अभङ्गश्लेषविभाग: ।

सर्वदोमाधव: योऽगङ्गाम्, काकोदर:, पूतनामारणख्यात:, हरिणाहितसक्तिना इत्यादौ परस्परं विलक्षणं पदभङ्गमपेक्ष्य नानार्थबोधनात् सभङ्गश्लेष: ।

अब्ज-कीलाल-वाहिनीपति-रक्तमण्डल-राजा इत्येतेषु पदेषु विलक्षणस्य पदभङ्गस्याभावात् अभङ्गश्लेष: ।

एवं प्रकारान्तरेण श्लेषोद्विविधः ।

### 5.3.2 अप्रस्तुतप्रशंसालङ्कारः

**अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया ।**
**एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥**

यत्र प्रस्तुतवृत्तान्तावगमनोद्देशेन अप्रस्तुतवृत्तान्तो वर्ण्यते तत्र अप्रस्तुतप्रशंसा ।

एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते इत्युदाहरणे शकुन्तेषु पक्षिषु मध्ये यः शक्राद् अन्यं इन्द्रादन्यं प्रभुं न याचते सः एकः चातक कृती कुशलः। अत्र सार्वभौमं विना अन्यं क्षुद्रं प्रभुं न प्रार्थये इत्यभिमानशालिनो वृत्तान्तस्य प्रस्तुतस्य प्रत्यायनार्थं तत्सदृशचातकवृत्तान्तो वर्णितात् अप्रस्तुतप्रशंसा ।

### अपरमुदाहरणम् -

**अबद्धकृत्रिमसटाजटिलांसभित्तिः आरोपिते मृगपतेः पदवीं यदि श्वा ।**
**मत्तेभकुम्भतटपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य ॥**

यदि कश्चन श्वा कृत्रिमतया सटजटाभिः सिंहरूपं स्वीकरिष्यत्यपि, मदगजस्य मस्तकविदारणे समर्थस्य सिंहस्य नादं कथमुत्पादयति। अत्र अप्रस्तुते शुनकवृत्तान्ते विद्वज्जनवदभिनयतो मूर्खस्य वृत्तन्तात् अप्रस्तुतप्रशंसा ।

## पुनरावृत्तिः (Recap)

- अनेकार्थगोचर: शब्दविन्यास: श्लेष: ।
- श्लेष: त्रिविध: ।
- वर्ण्याश्रय:, अवर्ण्याश्रय:, उभयाश्रय: च ।
- प्रकृतानेकार्थविषयशब्दविन्यासरूप: प्रकृतश्लेष:।
- प्रकृतश्लेषस्य उदाहरणं - सर्वदोमाधव: पायात् स योऽगंगामदीधरत् ।
- अप्रकृतानेकार्थविषयशब्दविन्यासरूप: अप्रकृतश्लेष: ।
- अप्रकृतश्लेषस्य उदाहरणं - अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ।
- प्रकृताप्रकृतानेकार्थगोचर: शब्दविन्यास: प्रकृताप्रकृतश्लेष: ।
- प्रकृताप्रकृताश्लेषस्य उदाहरणं - उच्चरद्भूरिकीलाल: शुशुभे वाहिनीपति: ।
- यत्र प्रस्तुतवृत्तान्तावगमनोद्देशेन अप्रस्तुतवृत्तान्तो वर्ण्यते तत्र अप्रस्तुतप्रशंसा ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. किं नाम श्लेषः ?
2. 'सर्वदोमाधव: पायात् स योऽगंगामदीधरत्' - कस्य अलङ्कारस्य उदाहरणमिदम् ।
3. अप्रकृतश्लेषस्य लक्षणं किम् ?
4. .......... स्यात् सा यत्र प्रस्तुताश्रया । (रिक्त स्थानं पूरयत )
5. 'उच्चरद्भूरिकीलाल: शुशुभे वाहिनीपति:' - अत्र अलङ्कारः कः?
6. प्रकृताप्रकृतश्लेषस्य लक्षणं किं भवति ?
7. अप्रस्तुतप्रशंसायाः लक्षणं किं भवति ?
8. 'एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते' - कस्य अलङ्कारस्य उदाहरणमिदम्?
9. .......... श्लेष: वर्ण्यावर्ण्योभयाश्रितः । (रिक्त स्थानं पूरयत )

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. श्लेषः कति विधः ? ते के ?
2. को नाम सभङ्गश्लेषः ?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. 'अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना'। अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।
2. अप्रस्तुतप्रशंसालङ्कारं विशदयत।
3. 'सर्वदोमाधवः पायात् स योऽगंगामदीधरत्' ।अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।

## निर्दिष्टाभ्यासः (Assignments)

1. श्लेषः सविभागान् विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. अनेकार्थगोचरः शब्दविन्यासः श्लेषः।
2. प्रकृतश्लेषस्य।
3. अप्रकृतानेकार्थविषयशब्दविन्यासरूपः अप्रकृतश्लेषः।
4. अप्रस्तुतप्रशंसा।
5. प्रकृताप्रकृताश्लेषस्य उदाहरणम्।
6. प्रकृताप्रकृतानेकार्थगोचरः शब्दविन्यासः प्रकृताप्रकृतश्लेषः।

7. अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।
8. अप्रस्तुतप्रशंसा।
9. नानार्थसंश्रयः।

## सूचनाग्रन्थौ (References)


1. T K Ramachandra Aiyar. Kuvalayananda of Appayyadikshitha, R.S. Vadhyar & sons, Kalpathy 2018
2. चन्द्रलोकसहितः श्रीमत्तत्सदुपाख्यवैद्यनाथसूरिविरचितया अलंकारचन्द्रिकाव्याख्यालंकृतः निर्णयसागर् मुम्बई 1907

BLOCK-6

# वृत्तम्

# Unit - 1
## वृत्तपरिचयः, वृत्तभेदाः, आर्यावृत्तम्, अनुष्टुप् च

### उद्देश्यानि (Learning Outcomes)

- संस्कृतवृत्तानां सामान्यज्ञानसम्पादनम्।
- संस्कृतवृत्तानां भेदान् जानाति।
- वृत्तनिर्धारणं कर्त्तुं क्षमता।

### प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतजगति प्रायः सर्वत्र एव छन्दसः प्रयोगः दृश्यते। श्लोकादिनिर्माणं तु छन्दसा विना प्रायः नैव सम्भवति। छन्दसा रचितं पद्यम् अधिकं सौन्दर्यं विदधाति। अत एव छन्दोमयं संस्कृतजगत् इत्यत्र नास्ति सन्देहावसरः। काव्यनाटकादिलौकिकशास्त्रेषु छन्दसः प्रचुरं प्रयोगः दरीदृश्यते। न केवलं लौकिकसाहित्ये छन्दसः प्रयोगः विद्यते। अपि तु वैदिकसाहित्ये अपि। केवलं यजुर्वेदः एव गद्यमयः वर्तते। अवशिष्टं संहितात्रयं तु पद्यमयम् अस्ति। सामवेदे अथर्ववेदे ऋग्वेदे च त्रिष्टुभादिना छन्दसा एव मन्त्राः विरचिताः सन्ति। छन्दः सहितमन्त्रः अधिककालपर्यन्तं स्मरणे तिष्ठन् सौन्दर्यं विधत्ते। प्राचीनशास्त्राकारैः वेदान्तादिशास्त्रग्रन्थाः अपि अनुष्टुभादिना छन्दसा एव रचिताः आसन्। संस्कृतजगति सर्वप्रथमं तु पद्यमयम् एव सर्वम् आसीत्। लौकिककाव्यादिषु अपि लौकिकछन्दसः प्रयोगः दृश्यते। वसन्ततिलकादिना छन्दसा एव रचितः श्लोकः अधिकः मनोग्राही भवति। कालिदासादयः महाकवयस्तु छन्दसा पद्यनिर्माण अतीव पटवः आसन्। केचन कवयस्तु एकं छन्दः समाश्रित्य सम्पूर्ण ग्रन्थं रचितवन्तः। अत एव छन्दः विना संस्कृतजगत् अन्धकारमयम् अस्ति। अतः संस्कृतजगति छन्दसः नितराम् आवश्यकता अनुभूयते। अस्मिन् एकके केदारभट्टस्य वृत्तरत्नाकरात् प्रसिद्धानां छन्दसां लक्षणानि उदाहरणानि च विशदयति।

## मुख्यपदानि (Keywords)

वृत्तं, जातिः, समवृत्तम्, अर्धसमवृत्तम्, विषमवृत्तम्, गणाः, लघुः, गुरूः, यतिः।

## Discussion

### 6.1.1 वृत्तपरिचयः

छादयति आच्छादयति इति छन्दसः लक्षणम्। यत् पापम् आच्छादयति, तत् छन्दः। यत् पापात् यजमानस्य पुरोहितस्य च आच्छादनं करोति, तत् छन्दः।

वृत्तरत्नाकरनिर्मात्रा केदारभट्टेन पिङ्गलाचार्यादीनां मतविवेचनपुरस्सरं लौकिकछन्दसः मात्राछन्दो वर्णछन्दोभेदात् द्वैविध्यमसौ कृतम्। यथोक्तं वृत्तरत्नाकरे -

**पिङ्गलादिभिराचार्यैः यदुक्तं लौकिकं द्विधा।**
**मात्रावर्ण विभेदेन छन्दस्तदिह कथ्यते॥**

अर्थात् पिङ्गलाचार्यः छन्दः द्विविधम् अस्ति इति प्रोक्तवान्। ते च वैदिकम्, लौकिकम् इति। तत्रापि लौकिकं छन्दः मात्राभेदेन वर्णभेदेन पुनः द्विधा अस्ति।

छन्दोमञ्जरीग्रन्थे पद्यलक्षणं उक्तञ्च - 'पद्यं चतुष्पदी' इति। चतुर्णां पादानां समाहारः चतुष्पदी इति।

तत्र अक्षरगणनया नियतं पद्यं वृत्तम्। मात्रागणनया नियतं पद्यञ्च जातिः इति। तदुक्तं हि छन्दोमञ्जर्याम् -

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।**
**वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्।।**

यत् पादचतुष्टयात्मकं पद्यम् भवति। तच्च द्विविधं वृत्तं जातिश्च। अक्षराणां निर्दिष्टसंख्यया नियमितं निबद्धं च पद्यं वृत्तम्। अक्षरसंख्यातम् अक्षरैः एकद्वयादिवर्णैः संख्यातं परिगणितं यत् तत् वृत्तं भवति। वृत्तस्य उदाहरणानि मालिनी उपेन्द्रवजा इत्यादि। जातिछन्दसः उदाहरणानि आर्या इत्यादयः।

### 6.1.2 वृत्तभेदाः

वृत्तस्य त्रयो भेदाः भवन्ति- १, समम्, २, अर्धसमम्, ३ विषमं चेति।

#### 6.1.2.1 समवृत्तम्

यत्र चत्वारः अपि चरणाः समवर्णाः समलक्षणयुक्ताश्च भवन्ति तत् समवृत्तम् इति कथ्यते। उक्तञ्च वृत्तरत्नाकरे

**अङ्घ्र्यो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।**

**तच्छन्दः शास्त्रतत्वज्ञः समं वृत्तं प्रचक्षते । । इति ।**

यस्य वृत्तस्य चत्वारो अङ्घ्रयः पादाः तुल्येन समानेन लक्षणेन लक्षिताः युक्ताः तत् छन्दशास्त्रमर्मज्ञाः समं वृत्तमिति वदन्ति । यथा उपेन्द्रवज्रादीनि ।

### 6.1.2.2 अर्धसमवृत्तम्

यस्य प्रथमपादः तृतीयपादसमः, द्वितीयपादश्च चतुर्थपादसमः तद् अर्धसमवृत्तम् इति कथ्यते। उक्तञ्च वृत्तरत्नाकरे -

**प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।**
**द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते । । इति ।**

यस्य छन्दसो प्रथमाङ्घ्रिसमः आद्यचरणसदृशः तृतीयः चरणः तथा द्वितीयः चरणः चतुर्थचरणतुल्यः तद्वद् अर्धसमवृत्तमिति कथ्यते । यथा उपचित्रादीनि ।

### 6.1.2.3 विषमवृत्तम्

- यस्य चत्वारश्चरणाः भिन्नभिन्नलक्षणयुताः भवन्ति तद्विषमवृत्तम् इत्युच्यते । उक्तञ्च वृत्तरत्नाकरे -

**यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।**
**तदाहुर्विषमं वृत्तं छन्दः शास्त्रविशारदाः । । इति ।**

यस्य छन्दसो चत्वारः पादाः परस्परम भिन्नलक्षणलक्षिताः तद् छन्दः शास्त्रविद्भिः विषमवृत्तमिति कथ्यते। यथा - कलिका

### 6.1.3 वर्णाः

छन्दशास्त्रानुसारं पद्ये प्रत्येकं अक्षरं लघुः गुरुः इति गणयति। स्वरसहितवर्णः एकोऽक्षरः इति गणयति। व्यञ्जनयुक्तानां स्वराणां कालगणनैव (ह्रस्वः दीर्घः वा) गुरूलघुर्वा इति गणयति। यतो हि तत्र स्वरस्तु केवलम् एकः अक्षरः एवाऽस्ति । छन्दसि अक्षरगणनायां व्यञ्जनं न गण्यते ।

### 6.1.4 लघुगुरूमात्रादिविवेकः

वर्णोच्चारणकाल एव मात्रा, सा च लघुगुरूभेदात् द्विधा ।

**एकमात्रो भवेद् ह्रस्वः द्विमात्रो दीर्घ उच्यते।**
**सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।**
**वा पादान्ते त्वसौ गु वक्रः ज्ञेयोऽन्यो मात्रिको ल्ऋजुः।।**

**एकमात्रो ह्रस्वः भवेत्** - एकमात्रिकं भवति लघुवर्णः। ह्रस्वः लघुसंज्ञं स्यात् अर्थात् ह्रस्वस्वरः लघुः तथा च ह्रस्वस्वरयुक्तः व्यञ्जनोऽपि लघुः। यथा – लघुस्वराः – अ, इ, उ, ऌ

**द्विमात्रो दीर्घ उच्यते** - द्विमात्रिकं भवति गुरूवर्णः। दीर्घस्वरस्य गुरूसंज्ञा भवति।दीर्घस्वरयुक्तस्य व्यञ्जनस्यापि गुरूसंज्ञा भवति। ते च – आ, ई ए, ऐ, ओ, औ, ता, नी, भू इत्यादीनि

**सानुस्वारः -** अनुस्वारयुक्तः वर्णोऽपि गुरूसंज्ञः भवति। यथा – वंशः, सायं, प्रियं इत्यादिषु वर्तमानाः वं,यं,प्रभृतयः।

**विसर्गान्तो** - विसर्गयुक्तः (:)वर्णः गुरूसंज्ञः भवति। यथा- पतिः, रामः, लेखकः। अत्र तिः, मः, कः गुरूवर्णः।

**युक्तपरश्च** - संयुक्ताद्यं गुरूसंज्ञं भवति अर्थात् संयुक्ताक्षराणां पूर्ववर्णः गुरुः मन्यते। यथा – यक्षः (क् +ष= क्ष)अत्र यकारः गुरुः।

**पादान्ते** - पदान्तवर्णस्तु विकल्पेन लघुः गुरूर्वा भवति। अन्यत् मात्रिकः लघुः भवति। छन्दः लक्षणे लघुवर्णस्य कृते "ल" प्रयुज्यते चिह्नश्च "(—)"। तथा गुरूवर्णस्य कृते " गु" "∪" प्रयुज्यते।

**गुरूलघुचिह्नकार्ये श्रद्धेयः कार्यः** –

छन्दशास्त्रे गुरूलघोः आधारेणैव गणः निश्चीयते। संस्कृतभाषायां प्रायेण गुरोः चिह्नं (∪) लघोः चिह्नं (—)च भवति। किन्तु कतिपयेषु ग्रन्थेषु विपरीतरूपेण दृश्यते। कैरल्यां गुरोः चिह्नं (—), लघोः चिह्नं (∪)च। कैरलीभाषायाः प्रभावः पठितारेषु सन्तीत्यतः चिह्नकरणे व्यतियानमागच्छति। अतः वृत्तभागस्थानां प्रश्नमुत्तरलेखनात् पूर्वम् अधोनिर्दिष्टरूपेण लिख्यते चेद्वरम्।

| |
|---|
| ग् वक्रः – ∪ |
| ल् ऋजुः- **—** |

ग्वक्रः ल् ऌजुः इति पदद्वयं मनसि वर्तितव्यम्। ग् (गुरुः) वक्रः **(∪)**। ल् (लघुः) ऋजुः **(—)**।

### 6.1.5 गणाः

वर्णानामथवा मात्राणां समूहः 'गण' उच्यते। एते गणाः लघु-गुरूवर्णाधारेण निर्मिताः भवन्ति। एते गणाः द्विधा विभज्यन्ते- 'वर्णगणः' 'मात्रागणश्च'। वर्णगण: 'त्रिवर्णात्मकः गणः' 'मात्रागणश्च चतुष्कलात्मकः गणः' उच्यते। त्रयाणां वर्णानां समूहः त्रिवर्णात्मकः। अष्टगणाः भवन्ति- यगणः, मगणः, तगणः, रगण, जगणः, भगणः, नगणः, सगणश्चेति । गणस्य अवगमार्थम् एकं सूत्रम् भवति- "यमाताराजभानसलगाः"। इति सूत्राधारेण सरलतया अष्टानां गणानां स्वरूपस्य बोधो जायते।

**'आदिमध्यावसानेषु यरता यान्ति लाघवम्।**
**भजसा गौरवम् यान्ति मनौ तु गुरूलाघवम्॥**

त्रिषु वर्णेषु, कदाचित् वर्णत्रयमपि समानम्, अर्थात् (———), (∪∪∪) वा। कदाचित् एकः गुरुः लघुः वा। आदौ, मध्ये, अन्ते, लघुः चेत् यरताः। एवम् आदौ, मध्ये, अन्ते गुरुः चेद्भजसाः। भगणः जगणः, सगणश्च क्रमशः आदौ, मध्ये, अन्ते च गुरूवर्णयुक्तो भवति । यगणः, रगणः, तगणश्च क्रमशः आदौ, मध्ये, अन्ते च लघुवर्णयुक्तो भवति। मगणे सर्वे गुरूवर्णाः भवन्ति। नगणे च सर्वे लघुवर्णः भवन्ति।

**गणचक्रम्-**

| **गणनाम** | **स्वरूपम्** | **देवता** | **फलम्** | **मित्रादि** |
|---|---|---|---|---|
| यगणः | आदिलघुः ।ऽ ऽ (—∪ ∪) | जलम् | वृद्धिः | भृत्यः |
| मगणः | त्रिगुरूः ऽ ऽ ऽ (∪∪∪) (सर्वगुरूः) | भूमिः | श्रीः | मित्रम् |
| तगणः | अन्तलघुः ऽऽ। (∪∪—) | आकाशः | धननाशः | उदासीनः |
| रगणः | मध्यलघुः ऽ। ऽ (∪—∪) | अग्निः | विनाशः | शत्रुः |
| जगणः | मध्यगुरूः। 5। (—∪—) | सूर्यः | रोगः | उदासीनः |
| भगणः | आदिगुरूः ऽ ऽ। (∪——) | चन्द्रः | सुयशः | भृत्यः |
| नगणः | त्रिलघुः।।। (———) (सर्वलघुः) | स्वर्गः | आयुः | मित्रम् |
| सगणः | अन्तगुरूः ॥ ऽ (——∪) | वायुः | भ्रमणम् | शत्रुः |

### 6.1.6 क्रमलक्षणम्

**पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः।**
**पुरः स्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः।।**

अत्र छन्दशास्त्रे पादादौ चरणादौ वर्णस्य संयोगः क्रम इति कथ्यते। तत्र क्वचिद् पुरः स्थितेन अग्रावस्थितेन तेन अपेक्षिते सति गुरोः गुरुवर्णस्य लघुतापि भजते। वा पादान्ते अथवा चरणान्ते ह्रस्ववर्णस्य गुरुत्वमपि जायते।

### 6.1.7 यतिः

येषु छन्दसु एकैकस्मिन् चरणे अक्षराणां मात्राणां वा संख्या न्यूना भवति तस्य वाचने तु काठिन्यं न भवति। परन्तु सुदीर्घचरणानां पाठे विश्रान्तिः आवश्यकी भवति। अतः पद्यवाचने यत्र यत्र स्थाने जिह्वा स्वेच्छया विश्रान्तिं करोति तद् 'यतिः' इत्युच्यते। यतेः त्रीणि नामान्तराणि सन्ति विच्छेदः, विरामः, विरुतिश्चेति।

**अब्धि भूतरसादीनां ज्ञेयाः संख्यास्तु लोकतः।**
**ज्ञेयः पादचतुर्थोऽशो यतिविच्छेदसंज्ञितः॥**

अब्ध्यादिपदैः यतिसंख्यां सूचयति। यथा- अब्धिः, समुद्राः - चत्वारः। भूत –पञ्च भूतानि। रसाः - षट्। पादचतुर्थोऽशो यतिविच्छेदसंज्ञितः। स्वरः, अगः -संख्या सप्त। वसु, नागः- संख्या अष्टा। ग्रह – संख्या नव। दिक् –दश। रुद्र- एकादश। आदित्या- द्वादश।

### 6.1.8 आर्यावृत्तम्

**लक्षणम्**

**लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।**
**षष्ठोऽयं नलघू वा प्रथमेऽर्थे नियतमार्यायाः॥**
**षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः।**
**चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥" इति।**

**व्याख्या** - आर्याच्छन्दसः प्रथमार्धे प्रथमद्वितीययोः चरणयोः एतत् उच्यमानं लक्ष्म (लक्षणम्) निश्चितम् अस्ति। किं तत् लक्षणम्। तदा उच्यते गुरुणा सहिताः सप्त संख्याकाः गणाः सन्ति। अस्याम् आर्यायां विषमे गणे (प्रथम-तृतीय-पञ्चम-सप्तमरूपे गणे) जगणः (मध्यगुरुः) न वर्तते। षष्ठस्थानवर्ती जगणः भवति। अथवा षष्ठे नगणेन साकं एकः लघुस्वरः वर्तते।

इदम् आर्याच्छन्दः मात्रिकच्छन्दः अस्ति। अर्थात् मात्राम् आधारीकृत्यैव गणस्य गणना भवति। प्रत्येकं गणेषु चतस्रः मात्राः भवन्ति। चतस्रः मात्राः सन्ति चेत् एव एकः गणः भवति।

अधुना यतिनियमं कथयति यदि षष्ठस्थानके गणे लघुस्वरेण साकं नगणः वर्तते तर्हि षष्ठस्थानके गणे चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति। तत्र चतुर्लघुरूपस्य षष्ठगणस्य तु द्वितीयलघोः पूर्वम् अर्थात् प्रथमलघौ यतिः भवति। एवञ्च षष्ठगणस्य प्रथमलधौ एव पदस्य समाप्तिः भवति। पुनश्च यदि सप्तमस्थानके गणे अपि चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति चेत्।

आर्यायाः प्रथमेऽर्धे त्रिंशत् मात्राः जायन्ते, प्रथमे चरणे द्वादशमात्राः, द्वितीयपादे अष्टादशमात्राः जायन्ते, उभयोः योगात् तत्रापि त्रिंशत्मात्राः जायन्ते। उत्तरार्धे च सप्तविंशतिः मात्राः भवन्ति।

आर्यायाः अपरं लक्षणमस्ति। यथा -

**यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयोऽपि**
**अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या।**

**उदाहरणं**

4 4 4
U — — — U — U U
हन्त वि/ रहः स /मन्तात्,

4 4 4 4 2
— — — — U U — U — U U U
ज्वलयति / दुर्वा / रतीव्र / संवे /गः।

4 4 4
— — U — — — — U — —
अरुण / स्तपनशि/ लामिव,

4 4 4 3

—∪— ∪ ∪ —∪— —∪

पुनर्न / मां भ/ स्मतां न/यति।।

अस्य उदाहरणस्य प्रथमे चरणे द्वादशमात्रा तथा तृतीयेऽपि। द्वितीये अष्टादशमात्रा, चतुर्थके पञ्चदश अतः अर्यायाः उदाहरणं भवति।

### 6.1.8 अनुष्टुप्

**लक्षणम्-**

**श्लोके षष्ठं गुरु ज्ञेयम् सर्वत्र लघु पञ्चमम्।**
**द्विचतुर्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः।।**

श्लोके षष्ठं वर्णं गुरुः भवेत्। सर्वत्र पञ्चमं वर्णं लघुः भवति। द्विचतुर्पादयोः सप्तमं वर्णं ह्रस्वं भवति। अन्ययोः पादयोः (प्रथम-तृतीययोः) सप्तमं वर्णं दीर्घं च भवेत् तर्हि अनुष्टुप् वृत्तं भवति।

—∪∪
**श्लोके षष्ठं गुरू ज्ञेयं**

—∪—
**सर्वत्र लघु पञ्चमम्।**

—∪∪
**द्विचतुर्पा द योः ह्रस्वं**

—∪—
**स प्त मं दी र्घ म न्य योः।।**

**व्याख्या -** यस्य प्रत्येकस्मिन् चरणे पञ्चममक्षरं लघु भवति। द्वितीयचतुर्पादयोः सप्तममक्षरं नित्यं ह्रस्वं भवति। प्रथमतृतीयचरणयोः सप्तममक्षरं गुरू भवति। एवं चेत् तत् 'अनुष्टुप्'नाम वृत्तं भवति।

**उदाहरणं वाल्मीकिरामायणात्**

—∪∪
**मा निषाद प्रतिष्ठांत्वं**

— ∪ —

**अगमः शाश्वतीः समाः।**

—∪∪

**यत्क्रौञ्चमिथुनादेकं**

—∪ —

**अवधीः काममोहितम्।।**

अस्मिन्नुदाहरणे सर्वत्र पञ्चमः वर्णः लघुरेव। सर्वत्र षष्ठः वर्णः गुरूरेव। पुनः द्वितीये चतुर्थे च चरणे सप्तमः वर्णः लघुः भवति। पुनश्च प्रथमतृतीये चरणे सप्तमः वर्णः दीर्घश्च। उदाहरणमिदं अनुष्टुप् वृत्तस्यलक्षणं भवति।

## पुनरावृत्तिः (Recap)

- छादयति आच्छादयति इति छन्दः।
- छन्दः द्विविधं- वैदिकं,लौकिकम्
- लौकिकछन्दांसि द्विविधानि- मात्रावृत्तम्, वर्णवृत्तम्।
- वृत्तं त्रिविधं- सम- अर्धसम-विषमभेदात्।
- एकमात्रिकः लघुः भवति।
- दीर्घः, अनुस्वारयुक्तः, विसर्गयुक्तः, संयुक्ताक्षरस्य पूर्वः लघुवर्णश्च गुरूर्भवति।
- पदान्तस्य लघोः विकल्पेन गुरूत्वम्।
- अष्टौ गणाः सन्ति।
- विश्रामस्थानं - यतिः, विच्छेदः, विरामः, विरुतिश्चेति।
- आर्यायाः प्रथमेऽर्धे त्रिंशत् मात्राः उत्तरार्धे च सप्तविंशतिः मात्राः भवन्ति।
- अनुष्टुप् श्लोके अष्टौ वर्णाः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. लघोः इत्यत्र कति मात्रा ?
2. यतिः का ?
3. अब्धिः इत्यनेन वृत्तशास्त्रे का संज्ञा उद्दिशति ?
4. कति गणाः ?
5. अनुष्टुप्वृत्ते पञ्चममक्षरं किम् ?
6. आर्यायाः तृतीये पादे कति मात्राः वर्तते ?
7. मात्रावृत्ते प्रत्येकं गणेषु कति मात्राः सन्ति ?
8. त्रिभिः गुरुभिः युक्तः गणः कः?
9. वृत्तभेदाः के ?
10. लौकिकछन्दः कतिविधः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।

**(Answer the following questions in one or two sentences)**

1. क्रमलक्षणं लिखत
2. छन्दः नाम किम् ?
3. गणाः कति? ते के?

## एकैकया खण्डिकया उत्तरं लिखत ।

**(Answer the following questions in a paragraph)**

1. लौकिकछन्दो भेदः लिखत ।
2. वृत्तभेदाः के ? विशदयत ।
3. आर्यायाः लक्षणं लिखत ।

## निर्दिष्टाभ्यासः (Assignments)

1. वृत्तं नाम किम् ? भेदान् विशदयत।
2. अनुष्टुप् छन्दसः लक्षणोदाहरणं प्रदर्शनीयत।
3. आर्यायाः लक्षणोदाहरणं विवेचयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. एकमात्रः लघुः।
2. विरामः।
3. चत्वारः।
4. अष्टौ।
5. लघुः।
6. द्वादश।
7. चतस्रः।
8. मगणः।
9. समवृत्तं, अर्धसमवृत्तं, विषमवृत्तम्।
10. द्विविधः।

## सूचनाग्रन्थौ (References)


1. केदारभट्टः. वृत्तरत्नाकरम्, चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020
2. टि के रामचन्द्र ऐय्यर्, लघुवृत्तरत्नाकरः, आर् एस् वाध्यार् आण्ड् सन्स् कल्पात्ति पालक्काट् 2003

# Unit - 2
## इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वसन्ततिलका च

### उद्देश्यानि (Learning Outcomes)

- संस्कृतवृत्तानां परिचयः।
- इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः इत्यादीन् वृत्तान् जानाति।
- वसन्ततिलकवृत्तस्य वैशिष्ट्यं जानाति।
- वृत्तनिर्धारणं कर्तुं क्षमता।

### प्राग्व्यपेक्षाः (Prerequisites)

वेदाः छन्दोबद्धाः भवन्ति। वैदिकमन्त्राणामुच्चारणज्ञानाय छन्दोज्ञानम् आवश्यकमस्ति। संस्कृते साहित्यरचनाः प्रायशः पद्यरूपेण भवन्ति इत्यतः छन्दशास्त्रस्य अधिकं प्राधान्यं अस्ति।'छन्दः पादौ तु वेदस्य' इत्युक्तत्वात् सिद्ध्यति छन्दशास्त्रं वेदस्य प्रधानमङ्गम्। छन्दसाहित्ये पिङ्गलसूत्रमेव प्रथममार्षग्रन्थरत्नम्। ततश्च केदारभट्टस्य वृत्तरत्नाकरः षडध्यायैर्निबद्धो यस्य हि पञ्चविंशतितोऽभ्यधिकाष्टीकाः सन्ति, गङ्गादासस्य छन्दोमञ्जरी षड्भिः स्तबकैर्निबद्धा, क्षेमेन्द्रस्य सुवृत्ततिलकम्, हेमचन्द्रस्य छन्दोऽनुशासनञ्चेति केचन ख्याताश्छन्दोविषयकग्रन्थाः। सम्प्रति इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वसन्ततिलका इत्यादीनि छन्दांसि पठामः।

### मुख्यपदानि (Keywords)

तौ, जगौ, गः, जतजाः, तभजाः, अनन्तरं, उदीरितं, लक्ष्म।

### Discussion

### 6.2.1 इन्द्रवज्रा (त्रिष्टुप्)

**लक्षणम् -**

**स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥**

यदि तौ जगौ गः वर्तन्ते चेत् इन्द्रवज्रावृत्तं भवति। पादान्ते यतिश्च।

**तगणः तगणः जगणः गु गु**

U U — U U — — U — U U

**स्यादिन्द्र / वज्रा य/ दितौ ज/ गौ गः।**

**व्याख्या-** यदि तौ – द्वौ तगणौ, जगौ – जगणगुरू, गः – पुनरेकगुरूः, चेत् सा इन्द्रवज्रा नाम वृत्तम्। तथाहि एकैकस्मिन् पादे तगणद्वयं जगणः गुरूद्वयं च यथाक्रमं भवन्ति चेत् इन्द्रवज्रा नाम वृत्तम्। इदं छन्दः समवृत्तस्य त्रिष्टुप्जातौ अन्तर्भवति। पादान्ते यतिः कल्पनीया। (श्लोकेषु विश्रमस्थानं यतिरित्यभिधीयते।

उदाहरणं कालिदासस्य कुमारसम्भवात् -

**तगणः तगणः जगणः गु गु**

U U — U U — — U — U U

**आमेख / लंसञ्च / रतांघ / ना नां**

**तगणः तगणः जगणः गु गु**

U U — U U — — U — U U

**छायाम / धःसानु / गतां नि/ षेव्य।**

**तगणः तगणः जगणः गु गु**

U U — U U — — U — U U

**उ द्वे जि/ तावृष्टि / भिराश्र / यन्ते**

**तगणः तगणः जगणः गु गु**

∪ ∪ — ∪ ∪ — — ∪ — ∪ ∪

**श्रृङ्गाणि / यस्यात / पवन्ति / सिद्धाः**

अस्मिन् उदाहरणे एकैकस्मिन् पादे क्रमेण तगणद्वयं जगणः गुरूद्वयं च सन्ति। अतः इदं इन्द्रवज्रायाः उदाहरणमेव।

## 6.2.2 उपेन्द्रवज्रा(त्रिष्टुप्)

**लक्षणम् -**

**उपेन्द्रवज्राजतजास्ततो गौ॥**

यदि जतजाः पुनः गुरूद्वयं च वर्तन्ते चेत् उपेन्द्रवज्रा। पादान्ते यतिश्च।

**जगणः तगणः जगणः गु गु**

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**उपेन्द्र/ वज्रा ज / तजास्त / तो गौ।**

**व्याख्या –** यत्र जतजाः – जगणः, तगणः, जगणः च। ततः – तदनन्तरं, गौ- गुरूद्वयं च, तत्र उपेन्द्रवज्रा नाम छन्दः। तथाहि प्रतिपादं जतजाः गुरूद्वयं च तत् उपेन्द्रवज्रा नाम छन्दः।

उदाहरणं कालिदासस्य कुमारसम्भवात्

**जगणः तगणः जगणः गु गु**

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**वनेच / राणां व / नितास / स्वानां**

**जगणः तगणः जगणः गु गु**

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**दरीगृ / होत्सङ्ग / निषक्त / भासः**

**जगणः तगणः जगणः**

**गु गु**

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**भवन्ति / यत्रौष / धयोर / जन्या**

**जगणः तगणः जगणः**

**गु गु**

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**मतैल / पूराः सु / रतप्र / दीपाः**

अस्मिन्नुदाहरणे प्रतिपादं जगणः तगणः जगणः गुरूद्वयं चेति एकादशवर्णाः सन्ति। अतः वृत्तम् उपेन्द्रवज्रेति कथ्यते। अत्रापि पादान्ते यतिनियमो वर्तते।

## 6.2.3 उपजाति(त्रिष्टुप्)

**लक्षणम्**

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयवुपजातयस्ताः।**
**इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम॥ इति॥**

इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करे उपजातिः नाम वृत्तम् भवति।

**जगणः तगणः जगणः**

गु गु

∪ ∪ — ∪ ∪ — — ∪ — ∪ ∪

**अनन्त /रोदीरि / तलक्ष्म / भाजौ**

**तगणः तगणः जगणः**

गु गु

— ∪ — ∪ ∪ — — ∪ — ∪ ∪

**पादौ य / दीयवु / पजात/ यस्ताः।**

**व्याख्या** - अत्र प्रथमेपादे उपेन्द्रवज्रायाः, द्वितीयेपादे इन्द्रवज्रायाः च मिश्रिणात् उपजातिः। न अन्तरम् अनन्तरम् अनन्तरेण व्यवधानराहित्त्येन उदीरिते वर्णिते अनन्तरोदीरिते पूर्वोक्तयोः इन्द्रवज्रायाः

उपेन्द्रवज्रायाः च लक्ष्म लक्षणम् तद्धजतस्तौ अनन्तरोदीरितलक्ष्मभाजौ। यस्या इमौ-यदीयौ पादौ दलद्वयेपि चरणौ । इत्थम्-अनेनैव प्रकारेण इन्द्रवज्रोपेन्द्रवज्रावत् । अन्यासु वक्ष्यमाणास्वपि जातिषु-जगत्यादिषु । मिश्रितासु-मिलितासु। इदम् एव नाम-उपजाति नाम। स्मरन्ति प्राञ्चः।

यथा कुमारसम्भवात् -

**तगणः तगणः जगणः**

U U — U U — — U — U U गु गु

**अस्त्युत्त/ रस्यां दि/ शिदेव/ तात्मा**

**जगणः तगणः जगणः**

— U — U U — — U — U U गु ग

**हिमाल/ यो नाम/ नगाधि/ राजः**

**तगणः तगणः जगणः**

U U — U U — — U — U U गु गु

**पूर्वाप/ रौ तोय/ निधीव/ गाह्य**

**जगणः तगणः जगणः**

— U — U U — — U — U U गु गु

**स्थितः पृ/ थिव्या इ/ व मान/ दण्डः**

अस्मिन् उदाहरणे प्रथमे पादे इन्द्रवज्रा, द्वितीये पादे उपेन्द्रवज्रा, तृतीये इन्द्रवज्रा, चतुर्थके उपेन्द्रवज्रा च।

अतः अत्र उपजातिरेव।

### 6.2.4 वसन्ततिलका (शक्करी)

**लक्षणम् -**

**उक्तं वसन्ततिलकं तभजा जगौ गः।**

तभजाः - तगणः भगणः जगणः च, जगै - जगणः गुरूश्च, गः - पुनरेक गुरूः यथाक्रमं भवन्ति चेत् वसन्ततिलकं नाम वृत्तम्। पादान्ते यतिश्च।

**तगणः भगणः जगणः जगणः**

U U — | U — — | — U — | — U — | U U गु गु

**उक्तं व / सन्तति / लकं त / भजा ज / गौ गः**

**व्याख्या -** शक्वर्यां वर्गे अतिप्रसिद्धं चतुर्दशवर्णयुक्तं वृत्तं भवति वसन्ततिलका। तभजाः – तगणभगणजगणाः, जगौ – जगणगुरूश्च, गः – पुनरेकगुरूश्चेत् तथा वसन्ततिलकं नाम उक्तम्। पादान्ते यतिश्च।

उदाहरणं अभिज्ञानशाकुन्तलात्

**तगणः भगणः जगणः जगणः**

U U — | U — — | — U — | — U — | U U **गु गु**

**यस्य त्व/ यात्रण / विरोप / णमिङ्गु/ दीनां**

**तगणः भगणः जगणः जगणः**

U U — | U — — | — U — | — U — | U U **गु गु**

**तैलन्य / षिच्यत / मुखे कु / शसूचि / विद्धे।**

**तगणः भगणः जगणः जगणः**

U U — | U — — | — U — | — U — | U U **गु गु**

**श्यामाक/ मुष्टिप / रिवर्धि / तकोज / हाति**

**तगणः भगणः जगणः जगणः**

U U — U — — — U — — U — U U **गु गु**

**सोऽयं न/ पुत्रकृ / तकः प / दवींमृ / गस्ते।**

अत्र तगणभगणजगणाः पुनः जगणः गुरूद्वयं च सन्ति। अतः वसन्ततिलका नाम छन्दसः उदाहरणमेव।

## पुनरावृत्तिः (Recap)

- स्यादिन्द्रवज्रा यदि तौ जगौ गः
- उपेन्द्रवज्राजतजास्ततो गौ
- अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
- उक्तं वसन्ततिलकं तभजा जगौ गः।
- त्रिष्टुप् जातौ अन्तर्भवति इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः।
- शक्वर्यां जातौ वर्तते वसन्ततिलका नाम वृत्तम्।
- चतुर्दशवर्णयुक्तं वृत्तं भवति वसन्ततिलका।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. उपेन्द्रवज्रा कस्मिन् जातौ वर्तते?
2. वसन्ततिलका वृत्ते कति अक्षराः सन्ति?
3. त्रिष्टुप् वर्गे कति वृत्तानि अस्मभ्यं पठनाय वर्तन्ते?
4. अनन्तरं इत्यस्य कोऽर्थः?
5. लक्ष्म इत्यस्य कोऽर्थः?
6. इन्द्रवज्रा - उपवज्रयोः सङ्करे विद्यमानं वृत्तं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. उपेन्द्रवज्रा वृत्तस्य लक्षणं लिखत।
2. इन्द्रवज्रायाः लक्षणं किम्?
3. वसन्ततिलकायाः लक्षणं किम्?
4. उपजाति वृत्तस्य लक्षणं लिखत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. इन्द्रवज्रा वृत्तस्य लक्षणं उदाहरणं च लिखत।
2. वसन्ततिलकायाः लक्षणोदाहरणं विवेचयत।
3. उपेन्द्रवज्रावृत्तस्य सलक्षणमुदाह्रियताम्।
4. अस्त्युत्तरस्यां दिशिदेवतात्मा हिमालयो नाम नागाधिराजः।
   पूर्वापरौ तोय निधीवगाह्य स्थितः पृथिव्या इव मानदण्डः।। अत्र किं वृत्तम्? तल्लक्षणं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. इन्द्रवज्रोपेन्द्रवज्रयोः भेदान् उदाहरणसहितं स्पष्टयत।
2. अधो दत्तानां वृत्तानां लक्षणं सोदाहरणं विशदयत।
   वसन्ततिलका, उपजातिः, इन्द्रवज्रा

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. त्रिष्टुपि।
2. चतुर्दश।
3. त्रीणि।
4. व्यवधानराहित्यम्।
5. लक्षणम्।
6. उपजातिः।

## सूचनाग्रन्थौ (References)


1. केदारभट्टः. वृत्तरत्नाकरम्, चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020
2. टि के रामचन्द्र ऐय्यर्, लघुवृत्तरत्नाकरः, आर् एस् वाध्यार् आण्ड् सन्स् कल्पात्ति पालक्काट् 2003


# Unit - 3
# मालिनी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा, वंशस्थञ्च

## उद्देश्यानि (Learning Outcomes)

- संस्कृतवृत्तानां परिचयः।
- मालिनी, मन्दाक्रान्ता, शार्दूलविक्रीडितं, स्रग्धरा, वंशस्थवृत्तानि जानाति।
- वृत्तनिर्धारणं कर्त्तुं क्षमता।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्यजगति छन्दसः प्रचुरं प्रयोगं दृश्यते। वैदिकसाहित्ये लौकिकसाहित्ये च छन्दसः प्रयोगः वर्तते। पूर्वस्मिन् एकके इन्द्रवज्रा-उपेन्द्रवज्रा-उपजाति-वसन्ततिलकेत्यादिनां वृत्तानां लक्षणविचारः, उदाहरणम्, यतिनियमश्च विशदयति। इन्द्रवज्रावृत्तस्य प्रतिपादं तगणद्वयं, जगणेन सह गुरुद्वयं च भवति। अस्य पादान्ते यतिः च वर्तते। उपेन्द्रवज्रावृत्ते जगणः तगणः जगणः ततः गुरुद्वयं च भवति। अस्य पादान्ते यतिः वर्तते। इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करे उपजातिः नाम वृत्तम्। वसन्ततिलकावृत्ते प्रत्येकं पादे तगणः भगणः जगणद्वयं गुरुद्वयं च भवति, इत्यादिविषयान् अधीतवन्तः। अस्मिन् एकके मालिनी-मन्द्राक्रन्ता-शार्दूलविक्रीडितं-स्रग्धरा वंशस्थादीनि वृत्तानि अधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

ननमययुतेयं, भोगिलोकैः, जलधिषडगैम्भौं, तौ, तात्, सूर्याश्वैर्मसजास्ततः, म्रभ्नैर्यानां, त्रिमुनियतियुता, जतौ, जरौ।

## Discussion

### 6.3.1 मालिनी (अतिशक्करी)

**लक्षणम् -**

**ननमययुतेयं मालिनी भोगिलोकैः।**

नगणनगणमगणयगणयगणाः यथाक्रमं भवन्ति चेत् मालिनी वृत्तम्। अष्टभिः सप्तभिः च यतिः।

**नगणः नगणः मगणः यगणः यगणः**

— — — | — — — | U U U | — U U | — U U

**ननम / ययु / तेयं मा/ लिनी भो / गिलोकैः**

**व्याख्या** – अतिशक्कर्यां वर्गे पञ्चदशाक्षरवृत्तिः भवति मालिनी नाम वृत्तम्। ननमयय – नगणनगणमगणयगणयगण युता - युक्ता इयं मालिनी भवति भोगिलोकैः अर्थात् अष्टभिः सप्तभिश्च यतिः (विरामः) भवति। यत्र आदौ षड्लघुवर्णाः प्रयुज्यन्ते तथा दशमः त्रयोदशश्च लघु भवति।

उदाहरणं अभिज्ञानशाकुन्तलात्-

**नगणः नगणः मगणः यगणः यगणः**
— — —   — — —   U U U   — U U   — U U
**सरसि / जमनु / विद्धंशै / वलेना / पि रम्यं**

**नगणः नगणः मगणः यगणः यगणः**
— — —   — — —   U U U   — U U   — U U
**मलिन / मपि हि / मांशोर्ल / क्ष्मलक्ष्मीं / तनोति**

**नगणः नगणः मगणः यगणः यगणः**
— — —   — — —   U U U   — U U   — U U
**इयम / धिकम / नोज्ञा,व / ल्कलेना / पि तन्वी,**

**नगणः नगणः मगणः यगणः यगणः**
— — —   — — —   U U U   — U U   — U U
**किमिव / हि मधु / राणां,म / ण्डनं ना / कृतीनाम्**

अस्मिन्नुदाहरणे नगणनगणमगणयगणयगणाः। अत्र सप्तभिः अष्टभिः च वर्णे विरामो भवति। अतः मालिन्याः उदाहरणमेव।

### 6.3.2 मन्दाक्रान्ता (अत्यष्टि)

**लक्षणम्** -

**मन्दाक्रान्ता, जलधिषडगैम्भौ नतौ ताद्गुरूचेत्।**

यत्र प्रतिपादं यथाक्रमं मगणभगणौ नगणतगणौ तगणः गुरूः गुरूश्च भवन्ति चेत् मन्दाक्रान्ता। चतुर्भिः षड्भिः सप्तभिश्च यतिः भवति।

मगणः  भगणः  नगणः  तगणः  तगणः

U U U  U — —  — — —  U U —  U U —  U U  गु गु

**मन्दाक्रा / न्ता,जल / धिषड / गैम्भौ न / तौताद्गु /रू चेत्।**

**व्याख्या** – सप्तदशाक्षरवर्णयुक्ता अत्यष्टौ जातौ प्रसिद्धं वृत्तं अस्ति मन्दाक्रान्ता। मन्दाक्रान्ता इत्यस्य अर्थः मन्दं - शनैः आक्रान्ता – अग्रे गच्छता। यदि म्भौ – मगणभगणौ नतौ – नगणतगणौ पुनः ताद्- तगणात् परं द्वौ गुरू च सन्ति चेत् सा मन्दाक्रान्ता। चतुर्भिः षड्भिः पुनः सप्तभिश्च यतिः।

उदाहरणं वेदान्तदेशिकस्य हंससन्देशात्-

**मगणः  भगणः  नगणः  तगणः  तगणः**

U U U  U — —  — — —  U U —  U U —  U U  **गु गु**

**वंशे जा / तः, सवि / तुरन / घे, मान/ यन्मानु / षत्वं**

**मगणः  भगणः  नगणः  तगणः  तगणः**

U U U  U — —  — — —  U U —  U U —  U U  **गु गु**

**देवः श्री/ मान्,जन / कतन / या,न्वेष / णे जाग / रूकः**

**मगणः  भगणः  नगणः  तगणः  तगणः**

U U U  U — —  — — —  U U —  U U —  U U  **गु गु**

**क्रीडालो/ लं, कम / लसर / सि, क्वापि/ कालोप / यातं,**

**मगणः  भगणः  नगणः  तगणः  तगणः**

U U U  U — —  — — —  U U —  U U —  U U  **गु गु**

**राकाच / न्द्र, द्युति / सहच / रं, राज / हंसं द / दर्श।**

अत्र मगणभगणनगणतगणाः पुनः तगणात् गुरूद्वयं च वर्तन्ते। चतुर्भिः षड्भिः पुनः सप्तभिश्च यतिः। अतः मन्दाक्रान्ता नाम छन्दसः उदाहरणमेव।

### 6.3.3 शार्दूलविक्रीडितम् (अतिधृतिः)

**लक्षणम्** -

**सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्।**

मगणसगणजगणाः सगणतगणतगणाःगुरूश्च भवन्ति चेत् शार्दूलविक्रीडितम्। द्वादशभिः सप्तभिः च यतिः।

**मगणः सगणः जगणः सगणः तगणः तगणः**

U U U / — — U / — U — / — — U / U U — / U U — / U **गु**

**सूर्याश्वै / र्मसजा / स्ततः स / गुरवः, / शार्दूल / विक्रीडि / तं,**

**व्याख्या**- नवदशाक्षरवृत्तिः अतिधृतौ जातौ वृत्तं भवति शार्दूलविक्रीडितम्। आदौ त्रयो वर्णाः गुरवो भवन्ति। मसजस्तताः – मगणसगणजगणसगणतगणतगणाः सगुरवः – एकेन गुरुणा च युक्तः, सूर्यैः – द्वादशभिः अश्वैः – सप्तभिः च यतिः (विरामः) चेत् स्युः तत् शार्दूलविक्रीडितम्।

उदाहरणं जयदेवस्य गीतगोविन्दात्

**मगणः सगणः जगणः सगणः तगणः तगणः**

U U U / — — U / U — / — — U / U U — / U U — / U **गु**

**आवासो/ विपिना / यते प्रि / यसखी, / मालापि/ जालाय / ते**

**मगणः सगणः जगणः सगणः तगणः तगणः**

U U U / — — U / — U — / — — U / U U — / U U — / U **गु**

**तातोऽपि/ श्वसिते / न दाव / दहन, / ज्वालाक / लापाय / ते**

**मगणः सगणः जगणः सगणः तगणः तगणः**

**गु**

U U U — —U —U— — —U UU— UU— U

**सापि त्व / द्विरहे / ण हन्त / हरिणी, / रूपाय / तेहा क / थं**

**मगणः सगणः जगणः सगणः तगणः तगणः** **गु**

U U U — —U —U— — —U U U— U U — U

**कन्दर्पो / ऽपि यमा / यते वि / रचयन्,/ शार्दूल / विक्रीडि / तं ।**

अत्र मगणसगणजगणसगणतगणतगणाः पुनः गुरूश्च द्वादशभिः सप्तभिः यतिश्च वर्तन्ते इत्यतः शार्दूलविक्रीडितस्य उदाहरणमेव ।

### 6.3.4 स्रग्धरा (प्रकृती)

**लक्षणम्** -

**म्रभ्नैर्यानां त्रयेण, त्रिमुनियतियुता, स्रग्धराकीर्तितेयम् ।**

यत्र मगणरगणभगणनगणाः यगणत्रयं यथाक्रमं प्रतिपादं भवन्ति चेत् स्रग्धरावृत्तम् । सप्तभिः सप्तभिः सप्तभिः च यतिः ।

**मगणः रगणः भगणः नगणः यगणः यगणः यगणः**

U U U U —U U — — — — — — U U — UU —UU

**म्रभ्नैर्या / नां त्रये / ण, त्रिमु / नियति / युता, स्र/ ग्धराकी / र्तितेयं**

**व्याख्या** – प्रकृतौ जातौ एकविंशत्यक्षरवर्णाः भवन्ति स्रग्धरा नाम छन्दः। म्रभ्नैः – मगणरगणभगणनगणैः यानां – यगणानां त्रयेण (त्रिभिः यगणैः) त्रिमुनियतियुता – त्रिवारं सप्तभिः सप्तभिः सप्तभिश्च यतिमतीत्यर्थः। एवं लक्षणं इयं स्रग्धरा कीर्तिता- कथिता। आदौ चत्वारो वर्णाः गुरवः भवन्ति। यत्र मगणरगणभगणनगणयगणत्रयं च सप्तभिः (त्रिवारं ) यतिश्च भवति तत्र स्रग्धरा नाम वृत्तम् ।

उदाहरणं अभिज्ञानशाकुन्तलात् –

**मगणः रगणः भगणः नगणः यगणः यगणः यगणः**

U U U U — U U — — — — — — U U — U U — U U

**यासृष्टिः/ स्रष्टुरा/ द्या, वह / ति विधि / हुतं, या / हविर्या/ च होत्री**

**मगणः रगणः भगणः नगणः यगणः यगणः यगणः**

U U U U — U U — — — — — — U U — U U — U U

**ये द्वे का / लं विध / त्तः, श्रुति/ विषय / गुणा, या/ स्थिताव्या / प्यविश्वं।**

**मगणः रगणः भगणः नगणः यगणः यगणः यगणः**

U U U U — U U — — — — — — U U — U U — U U

**यामाहु / स्सर्वभू / तप्रकृ / तिरिति / ययाप्रा / णिनः प्रा / णवन्तः**

**मगणः रगणः भगणः नगणः यगणः यगणः यगणः**

U U U U — U U — — — — — — U U — U U — U U

**प्रत्यक्षा / भिः प्रप / न्नस्तनु / भिरव / तु वस्ता / भिरष्टा / भिरीशः।**

अत्र मगणरगणभगणनगणाः यगणत्रयं त्रिवारं सप्तभिः च यतिश्च। अतः स्रग्धरा नाम वृत्तम्।

### 6.3.4 वंशस्थम् (जगती)

**लक्षणम्**

**जतौ तु वंशस्थमुदीरितं जरौ।**

यदि जतौ जरौ यथाक्रमं सन्ति चेत् वंशस्थं नाम वृत्तम्। पादान्ते यतिश्च।

**जगणः तगणः जगणः रगणः**

— U — U U — — U — U — U

**जतौ तु / वंशस्थ / मुदीरि / तं जरौ**

**व्याख्या** –वंशस्थम् उदीरितं - उक्तं चेत् – तु जतौ – जगणतगणौ जरौ- जगणरगणौ स्यातां तथा वंशस्थं नाम छन्दः। यत्र जगणतगणजगणरगणाः पादे यतिश्च तत्र वंशस्थं नाम छन्दः भवति। वंशस्थं वृत्तं जगत्यां वर्गे द्वादशवर्णाः भवेत्।

उदाहरणं शिशुपालवधात् -

**जगणः तगणः जगणः रगणः**

— U — U U — — U — U — U

**चयास्त्वि/षामित्य/ वधारि / तं पुरा**

**जगणः तगणः जगणः रगणः**

— U — U U — — U — U — U

**ततः श/ रीरीति/ विभावि/ ताकृतिं**

**जगणः तगणः जगणः रगणः**

— U — U U — — U — U — U

**विभूवि/ भक्ताव/ यवंपु / मानिति**

**जगणः तगणः जगणः रगणः**

— U — U U — — U — U — U

**क्रमाद / मुं नार / द इत्य / वेदि सः**

अस्मिन्नुदाहरणे जगणतगणजगणरगणाः पादे यतिश्च। अतः एतत् वंशस्थस्य उदाहरणमेव।

## पुनरावृत्तिः (Recap)

- ननमयययुतेयं मालिनी भोगिलोकैः।
- मालिनीवृत्ते अष्टभिः सप्तभिः च यतिः।

- मन्दाक्रान्ता, जलधिषडगैम्भौ नतौ ताद्गुरूचेत् ।
- चतुर्भिः षड्भिः सप्तभिश्च यतिः भवति ।
- सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् ।
- म्रभ्नैर्यानां त्रयेण, त्रिमुनियतियुता, स्रग्धराकीर्तितेयम् ।
- सप्तभिः सप्तभिः सप्तभिः च यतिः ।
- जतौ तु वंशस्थमुदीरितं जरौ ।
- वंशस्थं नाम वृत्ते पादान्ते यतिश्च ।
- वंशस्थं वृत्तं जगत्यां वर्गे द्वादशवर्णाः भवेत् ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. मालिनीवृत्तस्य लक्षणं किम् ?
2. मालिनीवृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति ?
3. मालिनीवृत्तं कस्मिन् जातौ वर्तते ?
4. मन्दाक्रान्ता वृत्ते कुत्र कुत्र यतिः वर्तते?
5. मन्दाक्रान्ता इत्यस्य अर्थः कः?
6. शार्दूलविक्रीडितम् इति वृत्ते कति अक्षराणि सन्ति ?
7. स्रग्धरावृत्ते कुत्र कुत्र यतिः वर्तते ?
8. जतौ जरौ यथाक्रमं भवन्ति चेत् वृत्तं किम् ?
9. त्रिमुनियतियुता इत्यस्य अर्थः कः?
10. स्रग्धरा वृत्ते कति अक्षरणि सन्ति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत ।
**(Answer the following questions in one or two sentences)**

1. मन्दाक्रान्ता वृत्तस्य लक्षणं किम् ? तस्य वृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति ?
2. शार्दूलविक्रीडितम् इति वृत्तस्य लक्षणं किमस्ति?
3. यासृष्टिः स्रष्टुराद्या, वहति विधिहुतं, या हविर्या च होत्री । अत्र किं नाम वृत्तोऽस्ति ?

## एकैकया खण्डिकया उत्तरं लिखत ।
**(Answer the following questions in a paragraph)**

1. मालिनीवृत्तस्य लक्षणं उदाहरणं च लिखत ।
2. सरसिजमनुविद्धं शैवलेनापि रम्यं

   मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति ।

   इयमधिकमनोज्ञा,वल्कलेनापि तन्वी,

   किमिव हि मधुराणां,मण्डनं नाकृतीनाम् ॥ अत्र किं वृत्तम् ? तल्लक्षणं लिखत ।

## निर्दिष्टाभ्यासः (Assignments)

1. अधोदत्तानां वृत्तानां लक्षणं सोदाहरणं लिखत ।

   शादूलविक्रीडितम्, वंशस्थम्, स्रग्धरा ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. ननमययययुतेयं मालिनी भोगिलोकैः ।

2. पञ्चदशाक्षराणि।
3. अतिशक्कर्याम्।
4. चतुर्भिः षड्भिः सप्तभिश्च यतिः वर्तते।
5. शनैः अग्रे गच्छता।
6. नवदशाक्षराणि।
7. सप्तभिः सप्तभिः सप्तभिः च यतिः भवति।
8. वंशस्थम्।
9. त्रिवारं सप्तभिः सप्तभिः सप्तभिश्चयतिमतीत्यर्थः।
10. एकविंशतिः।

## सूचनाग्रन्थौ (References)


1. केदारभट्टः. वृत्तरत्नाकरम्, चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020
2. टि के रामचन्द्र ऐय्यर्, लघुवृत्तरत्नाकरः, आर् एस् वाध्यार् आण्ड् सन्स् कल्पात्ति पालक्काट् 2003

# Unit - 4
## तोटकम्, पुष्पिताग्रा च

## उद्देश्यानि (Learning Outcomes)

- तोटकम् पुष्पिताग्रा वृत्ते च जानाति।
- अर्धसमवृत्तस्य विशेषतां अवगच्छति।
- वृत्तनिर्धारणं कर्तुं क्षमता।

## प्राग्व्यपेक्षाः (Prerequisites)

वेदाः छन्दोबद्धाः भवन्ति। वैदिकमन्त्राणामुच्चारणज्ञानाय छन्दोज्ञानम् आवश्यकमस्ति। ऋग्वेदसामवेदयोः सर्वे मन्त्राः छन्दोबद्धाः सन्ति। यजुर्वेदस्य गद्यात्मकाः पद्यात्मकाश्च सर्वे मन्त्राः छन्दोबद्धाः एव सन्ति। छन्दोवेदाङ्गस्य प्रतिनिधिभूतो ग्रन्थस्तु पिंगलाचार्यकृतं 'छन्दसूत्रम्' वर्तते। वृत्तरत्नाकरात् मालिनी, शार्दूलविक्रीडितम्, मन्दाक्रान्ता, स्रग्धरा, वंशस्थम् इत्यादीनि वृत्तानि अधीतानि। इदानीं तोटकं पुष्पिताग्र च पठामः।

## मुख्यपदानि (Keywords)

अम्बुधिसैः, अयुजि, नयुगरेफतो, युजि, नजौ, जरगाः।

## Discussion

### 6.4.1 तोटकम् (जगती)

**लक्षणम् –**

**इह तोटकमम्बुधिसैः प्रथितम्।**

यदि  चत्वारः सगणाः सन्ति चेत् तोटकं वृत्तम् । पादान्ते यतिश्च ।

**सगणः  सगणः  सगणः  सगणः**

– – U  – – U  – – U  – – U

**इह तो / टकम / म्बुधिसैः/ प्रथितं**

**व्याख्या –**इह – छन्दशास्त्रे अम्बुधिः – चतुर्भिः सैः – सगणैः  तोटकम् प्रथितम् – प्रसिद्धम् । तथाहि यत्र चत्वारः सगणाः, द्वादशाक्षरवृत्तिः, तत्र तोटकं नाम वृत्तं भवति । वृत्तस्य अन्तिमे अक्षरे यतिश्च भवति ।

उदाहरणं रघुवंशमहाकाव्यात् –

**सगणः  सगणः  सगणः  सगणः**

– – U  – – U  – – U  – – U

**स तथे / तिविने / तुरूदा / रमतेः**

**सगणः  सगणः  सगणः  सगणः**

– – U  – – U  – – U  – – U

**प्रतिगृ /ह्यवचो / विसस / र्जमुनिं**

**सगणः  सगणः  सगणः  सगणः**

– – U  – – U  – – U  – – U

**तदल / ब्धपदं / द्वदिशो /  कघने**

**सगणः  सगणः  सगणः  सगणः**

– – U  – – U  – – U  – – U

**प्रतिया / तमिवा/ न्तिकम / स्य गुरोः**

अस्मिन्नुदाहरणे एकैकस्मिन् पादे चत्वारः सगणाः सन्ति, पादे यतिश्च । तोटकस्य उदाहरणमिदम् ।

## 6.4.2 पुष्पिताग्रा (अर्धसमवृत्तम्)

**लक्षणम् -**

**अयुजि नयुगरेफतो यकारो**

**युजि च नजौ ज रगाश्च पुष्पिताग्रा।**

प्रथमे तृतीये च पादे नगणद्वयं रगणः यकारः, द्वितीये चतुर्थे च पादे नगणजगणौ जगणरगणौ गुरूश्च वर्तन्ते चेत् पुष्पिताग्रा नाम वृत्तम्।

**नगणः नगणः रगणः यगणः**

— — —   — — —   U — U   — U U

**अयुजि / नयुग / रेफतो / यकारो**

**नगणः जगणः जगणः रगणः गु**

— — —   — U —   — U —   U — U   U

**युजि च/नजौ ज/ रगाश्च/पुष्पिता/ ग्रा।**

**व्याख्या-** यदि अयुजि – विषमे पादे नयुगरेफतः -नगणनगणरगणात् परतः यकारः – यगणः स्यात् युजि – समे पादे नजौ – नगणजगणौ जरगाः – जगणरगणगुरवश्च स्युः तदा पुष्पिताग्रा नाम छन्दः उच्यते। प्रथमे तदा तृतीये पादे नगणनगणरगणयगणाः द्वितीये तथा चतुर्थे पादे नगणजगणजगणरगणाः गुरुः स्यात् तर्हि तत् पुष्पिताग्रा नाम वृत्तम्।

उदाहरणं भवभूतेः उत्तररामचरितात्

**नगणः नगणः रगणः यगणः**

— — —   — — —   U — U   — U U

**नरप / तिनिध / नं भव / त्प्रवासं**

**नगणः जगणः जगणः रगणः गु**

— — — — ∪ — — ∪ — ∪ — ∪ ∪

**भरत/ विषाद / मनाथ/ तां कुल/ स्य**

**नगणः नगणः रगणः यगणः**

— — — — — — ∪ — ∪ — ∪ ∪

**बहुवि / धमनु / भूयदु / ष्प्रसह्यं**

**नगणः जगणः जगणः रगणः** गु

— — — — ∪ — — ∪ — ∪ — ∪ ∪

**गुण इ/ व बह्व / पराद्ध / मायुषा / मे ।।**

अत्र विषमे पादे नगणनगणरगणयगणाः समे पादे नगणजगणजगणरगणगुरवश्च भवन्ति। अतः पुष्पिताग्रा नाम वृत्तस्य उदाहरणमेव।

## पुनरावृत्तिः (Recap)

- इह तोटकमम्बुधिसैः प्रथितम्।
- यस्य वृत्तस्य चत्वारः सगणाः सन्ति चेत् तोटकं वृत्तम्।
- पादान्ते यतिः भवति।
- जगत्यां जातौ वर्तते तोटकं वृत्तम्।
- अयुजि नयुग रेफतो यकारोयुजि च नजौ जरगाश्च पुष्पिताग्रा।
- पुष्पिताग्रा अर्धसमवृत्तं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. तोटकस्य लक्षणं किम्?
2. चतुर्भिः सगणैः युक्तं वृत्तं किमस्ति?
3. पुष्पिताग्रा कस्मिन् वृत्तविभागे अन्तर्भवति?
4. तोटकं कस्मिन् वृत्तविभागे अन्तर्भवति?
5. अर्धसमवृत्तस्य एकमुदाहरणं लिखत।

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. तोटकस्य एकम् उदाहरणं किम्?
2. 'स तथेतिविने तुरूदा रमतेः।
   प्रतिगृह्यवचोविससर्जमुनिं' -अत्र किं छन्दोऽस्ति?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. तोटकस्य लक्षणं उदाहरणं च लिखत।
2. 'नरपतिनिधनं भवत्प्रवासं
   भरतविषादमनाथतां कुलस्य
   बहुविधमनुभूयदुष्प्रसह्यं
   गुण इव बह्वपराद्धमायुषा मे'।। अत्र कः छन्दः? तल्लक्षणं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. अधोदत्तानां वृत्तानां लक्षणं सोदाहरणं विशदयत।

पुष्पिताग्रा, तोटकम्।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. इह तोटकमम्बुधिसैः प्रथितम्।
2. तोटकम्।
3. अर्धसमवृत्ते।
4. जगत्यां समवृत्ते च।
5. पुष्पिताग्र।

## सूचनाग्रन्थौ (References)


1. केदारभट्टः. वृत्तरत्नाकरम्, चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020
2. टि के रामचन्द्र ऐय्यर्, लघुवृत्तरत्नाकरः, आर् एस् वाध्यार् आण्ड् सन्स् कल्पात्ति पालक्काट् 2003

Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**SIXTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN07DC - वृत्तं अलङ्कारं चम्पू च**
**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. युञ्जतोः शिवयोः वीर्यं कः प्रतिजग्राह ?
2. त्रिशङ्कुं के चण्डालभावं अकुर्वन् ?
3. जनकस्य कनीयान् कः?
4. भृगुवंशसम्भवः कः?
5. कैमर्थ्यं इत्यस्य कोऽर्थः ?
6. 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः' । अत्र कस्य अलङ्कारस्य उदाहरणमिदम्?
7. रूपकं नाम किम् ?
8. अतिशयोक्तिः कतिविधा ?
9. 'सामान्यविशेषयोः उक्तिः' - अत्र कस्य अलङ्कारस्य लक्षणमिदम् ?
10. दृष्टान्तालङ्कारस्य लक्षणं लिखत।

11. अपह्नुतिः इत्यस्य कोऽर्थः?

12. तुल्ययोगिता कतिविधा ?

13. किं नाम श्लेषः ?

14. यतिः का ?

15. अनन्तरं इत्यस्य कोऽर्थः?

## SECTION - B
## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत ।** **(5x2=10)**

**(Answer any five Questions in one or two sentences)**

16. भोजरीत्या चम्पूकाव्यलक्षणं लिखत ।

17. लङ्का कीदृशी अस्ति ?

18. पार्वत्याः शापः कः ?

19. कथं शापात् अहल्या मुक्ता भवतीति गौतममहर्षिः उक्तवान् ?

20. उपमायाः अवयवाः के?

21. चतुर्थस्य प्रतीपमलङ्कारस्य लक्षणं किम् ?

22. संबन्ध - असंबन्धातिशयोक्त्योः भेदः कः ?

23. उल्लेखः कतिविधः ? ते के ?

24. अपह्नुतिः कतिविधा ? ताः काः ?

25. न्यूनत्वपर्यवसायिनः व्यतिरेकस्य उदाहरणं लिखत ।

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।** **(6x5=30)**

**(Answer any six Questions)**

26. चम्पूरामायणानुसारं ताटकां वर्णयत।

27. 'पिप्पलदण्डयोग्यः पलाशदण्डाद्दतपाणिरासीत्'। -व्याख्यात।

28. 'दुःखे सुखे च रज एव बभूव हेतुः ताद्दग्विधे महति गौतमधर्मपत्न्याः।
यस्माद्गुणेन रजसा विकृतिं गता सा रामस्य पादरजसा प्रकृतिं प्रपेदे'॥ - ससन्दर्भं व्याख्यात।

29. 'कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्यः सन्ति हि स्त्रियः'। अत्र कः अलङ्कारः? लक्षणसमन्वयं कुरुत।

30. चपलातिशयोक्तेः उदाहरणसहितं लक्षणं लिखत।

31. अर्थन्तरन्यासालङ्कारम् उदाहरणसहितं विशदयत।

32. 'त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्' - कस्य अलङ्कारस्योदाहरणमिदं लक्षणसमन्वयं कुरुत।

33. कैवतावपह्नुतेः लक्षणं किम्? उदाहरणसहितं प्रतिपादयत।

34. चतुर्थीतुल्ययोगितां विशदयत।

35. अप्रस्तुतप्रशंसालङ्कारं विशदयत।

36. तोटकस्य लक्षणं उदाहरणं च लिखत।

37. 'सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।
इयमधिकमनोज्ञा,वल्कलेनापि तन्वी,
किमिव हि मधुराणां,मण्डनं नाकृतीनाम्'॥ अत्र वृत्तं किम्? तल्लक्षणं लिखत।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. प्रदत्तानां वृत्तानां लक्षणं सोदाहरणं विशदयत - वसन्ततिलका, उपजातिः, इन्द्रवज्रा।

39. चम्पूरामायणस्य बालकाण्डानुसारेण क्षीरसागरे देवैर्दृष्टस्य भगवतः विष्णोः वर्णनं कुरुत।

40. चम्पूरामायणमाश्रित्य भागीरथीकथां वर्णयत।

41. उपमां तद्भेदान् च विशदयत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**SIXTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN07DC - वृत्तं अलङ्कारं चम्पू च**
**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. हिमवतः कन्ये के ?
2. विशालनामिकां नगरीं कः निर्मितवान्?
3. कीदृशीं जनकराजधानीं प्रविष्टः विश्वामित्रादयः?
4. कृतविवाहैः विदेहेभ्यः प्रतिनिवर्तमानः दशरथः - कम् अद्राक्षीत्?
5. सादृश्यं नाम किम् ?
6. प्रतीपम् इत्यस्य कोऽर्थः?
7. वस्तूत्प्रेक्षा कति विधास्ति?
8. अक्रमातिशयोक्तेः लक्षणं किं भवति ?
9. 'गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने' - कस्य अलङ्कारस्य उदाहरणमिदम् ?
10. बिम्बप्रतिबिम्बत्वं चेद् ........... । (रिक्तं पूरयत)

11. शुद्धापह्नुतेः लक्षणं किम् ?

12. 'प्रदीयते परभूतिर्मित्रशात्रवयोस्त्वया' - अत्र अलङ्कारः कः ?

13. प्रकृताप्रकृतश्लेषस्य लक्षणं किं भवति ?

14. मन्दाक्रान्ता वृत्ते कुत्र कुत्र यतिः वर्तते?

15. चतुर्भिः सगणैः युक्तं वृत्तं किमस्ति?

## SECTION - B
## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**

**(Answer any five Questions in one or two sentences)**

16. अङ्गदेशस्य अङ्ग इति नाम कथं अभूत् ?

17. पवमानः किम् अतनुत ?

18. जगति मिथिलां सूतिकागेहम् इति आहुः। कुतः?

19. दशरथस्य पुत्राणां स्नुषाणां च नामानि लिखत।

20. रूपकमलङ्कारस्य लक्षणं किम् ?

21. उत्प्रेक्षा कतिविधास्ति ? ताः काः ?

22. किं नाम बिम्बप्रतिबिम्बभावः ?

23. प्रथमा-द्वितीयोल्लेखयोः को भेदः ?

24. श्लेषः कतिविधः ? ते के ?

25. रूपक-अपह्नुत्योः को भेदः ?

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। (6x5=30)**

**(Answer any six Questions)**

26. लुप्तोपमां विशदयत।

27. 'मध्य: किं कुचयोर्धृत्यै बद्ध: कनकदामभि:' ।अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।

28. न्यूनाभेदरूपकं सोदाहरणं प्रतिपादयत।

29. समासोक्तिः नाम अलङ्कारं विशदयत।

30. शुद्धापह्नुतिं विशदयत।

31. 'शैला इवोन्नता: सन्त: किन्तु प्रकृतिकोमला:' । कस्य अलङ्कारस्य उदाहरणमिदम्? विशदयत।

32. 'अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना' । अत्र अलङ्कारः कः ? लक्षणसमन्वयं कुरुत।

33. स्रग्धरायाः लक्षणं उदाहरणं च लिखत।

34. 'नरपतिनिधनं भवत्प्रवासं
भरतविषादमनाथतां कुलस्य
बहुविधमनुभूयदुष्प्रसह्यं
गुण इव बह्वपराद्धमायुषा मे' ।। अत्र वृत्तं किम्? तल्लक्षणं लिखत।

35. 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम्' ।। - ससन्दर्भं व्याख्यात।

36. रावणपराक्रमेण भानेरवस्थां विशदयत।

37. रामस्य शिवधनुषः भङ्गं वर्णयत।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x10=20)**
**(Write an essay on any two of the following)**

38. प्रदत्तानां वृत्तानां लक्षणं सोदाहरणं विशदयत - मालिनी, शार्दूलविक्रीडितम्, वंशस्थम्।

39. चम्पूरामायणानुसारं कौशिकावृत्तान्तं प्रतिपादयत।

40. चम्पूरामायणे बालकाण्डे सीतास्वयंवरं वर्णयत।

41. श्लेषः सविभागान् विशदयत ।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

NO TO DRUGS

# തിരിച്ചിറങ്ങാൻ പ്രയാസമാണ്



NO TO DRUGS

ആരോഗ്യ കുടുംബക്ഷേമ വകുപ്പ്, കേരള സർക്കാർ

# वृत्तं अलङ्कारः चम्पू च

COURSE CODE: B21SN07DC

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-986822-7-7